Digitized by Arya Samaj Foundation Chennai and eGangotri

18040
6

1804C
6

A

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार
कृपया पुस्तक के ऊपर कोई निशान
आदि न लगायें।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४४,८८६

1.804C/6

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

वर्ग संख्या ८१३/१८ आ. सं. ४४,८८६

पुस्तक-वितरण की तिथि नीचे अंकित है। इस तिथि सहित १५वें दिन तक यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए। अन्यथा ५ पैसे प्रतिदिन के हिसाब से विलम्ब-दण्ड लगेगा।

23 SEP 1982

R
813
ATH-A

COMPILED

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल
कृपया पु
अ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४६,८८६

CHECKED 1973
Initial

॥ ॥ अथ श्री सुमध्वविजयप्रारंभः ॥ ॥

म— ९८०४

R813,ATH-A
44887

COMPIL

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिदिशेसवीरः ॥ १३ ॥ कर्णांतमानीयगुणग्रहीत्रारामेणमुक्तोरण
कोविदेन ॥ स्फुरन्नसौवैरिभयंकरोभूत्सत्पक्षपातीप्रदरोयथाग्र्यः ॥
गोभिःसमानंदितरूपसीतःस्ववन्हिनिर्दग्धपलाशिराशिः ॥ अहो
हनूमन्नववारिदोसौतीर्णांबुधिर्विष्णुपदेननाम॥ १५॥ अपक्षपातीपुरु
षस्त्रिलोक्यामभोगभोक्तापतगाधिराजं॥विश्वंभरंबिभ्रदसौजिगायत्व
रापराक्रांतिषुचित्रमेतत् ॥ १६ ॥ निबध्यसेतुंरघुवंशकेतुर्भ्रूभंगसंभ्रां
तपयोधिमध्ये ॥ मुष्टिप्रहारंदशकायसीतासंतर्जनाग्र्योत्तरमेषकोदा
त् ॥ १७ ॥ जाज्वल्यमानोज्वलराघवाग्नौचक्रेससुग्रीवसुयायजूके॥
आध्वर्यवंयुद्धमखेप्रतिप्रस्थात्रासुमित्रातनयेनसाकं ॥ १८ ॥ रामा
र्चनेयोनयतःप्रसूनंद्वाभ्यांकराभ्यामभवत्प्रयत्नः ॥ एकेनदोष्णानय
...हजान्दधानः ॥ ...दानरनाश्न... ॥ १९ ॥ सदारिनारिपरमंप
सभामः ॥ ४४ ॥ विष्णु...दातन......पारमघातारा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

...नवराधिगतात्मशुद्ध्यांविराजि
...काचनमालयव ॥ २० ॥ श्यामंस्मितास्यंपृथुदीर्घहस्तंसरोजनेत्रं
गजराजयात्रं ॥ वपुर्जगन्मंगलमेषदृग्भ्यांचिरादयोध्याधिपतेःसिषे
वे ॥ २१ ॥ राज्याभिषेकेवसितेत्रसीताप्रेष्ठायनस्तांभजतांदिशेति॥
रामस्यवाण्यामणिमंजुमालाव्याजेनदीर्घांकरुणांबबंध ॥ २२ ॥ त्वद्
दोरुसौहार्द्रभृताधिमौलिन्यस्तेनहस्तेनदयार्द्रदृष्ट्या ॥ सेवाप्रसन्नोमृ
तकल्पवाचादिदेशदेवःसहभोगमस्मै ॥ २३ ॥ प्रेष्ठोनरामस्यबभूव
तस्मान्नरामराज्येसुलभंचकिंचित् ॥ तत्पादसेवारतिरेषनैच्छत्तथा
पिभोगाननुसाविरक्तिः ॥ २४ ॥ नमोनमोनाथनमोनमस्तेनमोनमो
रामनमोनमस्ते ॥ पुनर्नमस्तेचरणारविंदंनमामिनाथेतिनमन्नुसरे ॥ २ ॥
मे ॥ २५ ॥ किंवर्णयामःपरमंप्रसादंसीतापतेस्तत्रहरिप्रबर्हे ॥ मुंच

CC-0. Gurukul Kangri Collection, Haridwar

न्महींनित्यनिषेवणार्थंस्वात्मानमेवैषददौयदस्मै ॥ २६ ॥ स्वानंदहे
तौभजतांजनानांमग्नःसदारामकथासुधायां ॥ असाविदानींचनिषेव
माणोरामंपतिंकिंपुरुषेकिलास्ते ॥ २७ ॥ तस्यैववायोरवतारमेनंसं
तोद्वितीयंप्रवदंतिभीमं ॥ स्पृष्टेवयंप्रीतिमतानिलेननरेंद्रकांतासुषु
वेत्रकुंती ॥ २८ ॥ इंद्रायुधंहींद्रकराभिनुन्नंचिच्छेदपक्षात्क्षितिधारि
णांप्राक् ॥ बिभेदभूभृद्वपुरंगसंगाच्चित्रंसपन्नोजननीकराग्रात् ॥ २९
पुरःकुमारानलसान्विहारान्निरीक्ष्यसर्वानपिमंदलीलः ॥ कैशोरली
लांहतसिंहसंघांवनेप्रवृत्तांस्मरतिस्मसूक्तः ॥ ३० ॥ भुक्तंचजीर्णंपरि
पंथिदत्तंविषंविषण्णोविषभृद्गणोतः ॥ प्रमाणकोठेःसहहेलयागान्नेदं
जगज्जीवनदेत्रचित्रं ॥ ३१ ॥ दग्ध्वापुरंयोगबलात्सनिर्यन्धर्मानिव
रहजान्त्धुानः ॥ अदारिभावेनजगत्सुपूज्योयोगीवनारीमपीत्रेधरा
सभीमः ॥ ४४ ॥ ... स्वंसह
विष्णोःपदांतंभजतानिलेनघोरप्रघातैरिति

Digitized by Arya Samaj Foundation Chennai and eGangotri

...ाद ॥ ३२ ॥ सम्यक्कृत्यानिकृतीकृतानि‌‌‌‌ठ्यासायभूम्नेसराजि
नितावत् ॥ करिष्यमाणानिचतस्यपूजांसंकल्पयामाससशुद्धबुद्धिः ॥
॥ ३३ ॥ विष्णोःपदश्चिह्नकसंन्निरासीक्षिप्तान्यपाक्षिप्रकरःसुपक्षः॥ ससो
दरोथादितराजहंसःसराजहंसीमिवराजकन्यां ॥ ३४ ॥ इंदीवरश्रीजय
सुंदराभंस्मेराननेंदुंदयितंमुकुंदं ॥ स्वमातुलेयंकमलायताक्षंसमभ्यनं
दत्सुचिरायभीमः ॥ ३५ ॥ महागदंचंडरणंपृथिव्यांबार्हद्रथंमंक्षुनिर
स्यवीरः ॥ राजानमत्युज्ज्वलराजसूयंचकारगोविंदसुरेंद्रजाभ्यां ॥ ३६ ॥
दुःशासनेनाकुलितान्प्रियायाःसूक्ष्मानरालानसितांश्चकेशान् ॥ जि
घांसयावैरिजनस्यतीक्ष्णःसकृष्णसर्पंनिवसीचकाय ॥ ३७ ॥ जाज्व
ल्यमानस्यवनेवनेलंदिधक्षतःपार्थिवसार्थमुग्रं ॥ सत्वानिपुंसांभयदा
निनाशंहृकोदराग्नेर्गुरुतेजसापुः ॥ ३८ ॥ भोगाधिकाभोगवतोरणा

स्वानु०

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षानितस्ततःसंचलतोधरेंद्रे ॥ बहून्द्विजिंव्हान्मणिमत्पुरोगानसौकटू
न्क्रोधवशान्जघान ॥ ३९ ॥ अथैषवेषांतरभस्मलीनःक्रमेणवायुप्र
भवःसुतेजाः ॥ रुद्धाखिलाशंमुखरंप्रचंडंभस्मीचकाराखिलकीचकौ
घं ॥ ४० ॥ सकृष्णवर्त्माविजयेनयुक्तोमुहुर्महाहेतिधरोप्रधृष्यः ॥ भी
ष्माद्विजाद्यैरतिभीषणाभंविपक्षकक्षंक्षपयन्विरेजे ॥ ४१ ॥ तरस्विनः
प्रोच्छलितानधीरान्निर्दग्धपक्षानतितीक्ष्णकोपान् ॥ सधार्त्तराष्ट्रान्ब
हुहेतिलीलोविनाश्यविश्वान्परयाश्रियाभात् ॥ ४२ ॥ कृष्णांघ्रिपंके
रुहभृंगराजःकृष्णामुखांभोरुहहंसराजः ॥ प्रजासरोजावलिराश्मिरा
जःससोदरोराजतवीरराजः ॥ ४३ ॥ पौत्रेपवित्राव्हयजामिपौत्रेधरा
निधायासुरधीषुतापं ॥ कीर्तिंत्रिलोक्यांहृदयेमुकुंदंभेजेपदंस्वंसहतै
सभीमः ॥ ४४ ॥ विष्णोःपदांतंभजतानिलेनघोरप्रघातैरितिगु

CC-0. Gurukul Kangri Collection, Haridwar

... पराजि

तास्ते ॥ रसोज्झिताश्वंचलवृत्तयोलंशोभांनभेजुःसुरवैरिमेघाः ॥

एतत्प्रतीपंकिलकर्तुकामानष्टौजसःसंकटमेवमाप्य ॥ मुकुंदवैगुण्य

थांस्वयोग्यांकालेकलावाकलयंततेलं ॥ ४६ ॥ योभूरिवैरोमाणिमा

न्मृतःप्राग्वाग्मीबुभूषुःपरितोषितेशः ॥ ससंकराख्योंघ्रितलेषुजज्ञे

स्पृधापरेप्यासुरिहासुरेंद्राः ॥ ४७ ॥ सान्नायमव्यक्तहृदाखुभुग्वाश्वा

वापुरोडाशमसारकामः ॥ मणिस्रजंवाप्लवगोऽयवस्थोजग्राहवेदादि

कमेषपापः ॥ ४८ ॥ जनोनमेन्नापरथेतिमत्वाशठश्चतुर्याश्रममेषभे

जे ॥ पद्माकरंवाकलुषंचिकीर्षुःसुदुर्दमोदुष्टगजोविशुद्धं ॥ ४९ ॥ अ

वैदिकंमाध्यमिकंनिरस्तंनिरीक्ष्यतत्पक्षसुपक्षपाती ॥ तमेवपक्षंप्रति

पादिकोसौन्यरूरुपन्मार्गमिहानुरूपं ॥ ५० ॥ असत्पदेसन्सदसाद्वि

विक्तंमायाख्ययासंवृतिमभ्यधत्त ॥ ब्रह्माप्यखंडंवतशून्यासिध्यैप्रछ

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्नबौद्धोयमतःप्रसिद्धः ॥ ५१ ॥ यद्ब्रह्मसूत्रोत्करभास्करंचप्रकाशयं
तंसकलंस्वगोभिः ॥ अचूचुरद्वेदसमूहवाहंततोमहातस्करमेनमाहुः
॥ ५२ ॥ स्वसूत्रजातस्यविरुद्धभाषीतद्भाष्यकारोहमितिब्रुवन्यः ॥
तंतत्क्षणाद्योनदिधक्षतिस्मसव्यासरूपोभगवानूक्षमाब्धिः ॥ ५३ ॥
निगमसन्मणिदीपगणोभवत्तदुरुवाग्गणपंकनिगूढभाः ॥ अविदुषा
मितिसंकरताकरःसकिलसंकरइत्यभिशुश्रुवे ॥ ५४ ॥ विश्वंमिथ्या
विभुरगुणवानात्मनांनास्तिभेदोदैत्याइत्थंव्यदधतगिरांदिक्षुभूयःप्र
सिद्धिं ॥ आनंदाद्यैर्गुरुगुणगणैःपूरितोवासुदेवोमंदंमंदंमनासिचस
तांहंतनूनंतिरोभूत् ॥ ५५ ॥ इतिश्रीमध्वविजयेमहाकाव्येआनंदां
केप्रथमःसर्गः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

CC-0. Gurukul Kangri Collection, Haridwar

श्रीनृसिंहायनमः ॥ अथद्वितीयसर्गः ॥ श्री ॥ विज्ञानभानुमतिका
लबलेनलीनेदुर्भाष्यसंतमससंततितोजनेंधे ॥ मार्गात्सतांस्खलति
खिन्नहृदोमुकुंदंदेवाश्चतुर्मुखमुखाःशरणंप्रजग्मुः ॥ १ ॥ नाथःकलौ
त्रियुगहूतिरनुद्बुभूषुर्वह्माणमप्यनवतारमनादिदिक्षुः ॥ सर्वज्ञमन्य
मनवेक्ष्यसकार्यवीर्यस्मेराननोभुवनजीवनमाबभाषे ॥ २ ॥ वेदांतमा
र्गपरिमार्गणदीनदृनादैवीःप्रजाविशरणाःकरुणापदंनः ॥ आनंदयेः
सुमुखभूषितभूमिभागोरूपांतरेणममसद्गुणनिर्णयेन ॥ ३ ॥ आदेशमौ
लिमणिमुज्वलवर्णमेनंबद्धांजलिर्मरुदनर्घ्यमधत्तमूर्ध्ना ॥ हारावलीमि
वहृदाविबुधेंद्रयाच्ञांबिभ्रन्निजाननुजिघृक्षुरवातितीर्षत् ॥ ४ ॥ कालः
सएवसमवर्ततनामयावद्विंताकुलंविविधसाधुकुलंबभूव ॥ वेदांतसंत
तकृतांतरसंनाविघ्नःश्रेयोलभेमहिकथंनुवयंबतेति ॥ ५ ॥ तत्प्रीतयेरज

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपाठपुराधिवासीद्देवोविवेशपुरुषंशुभसूचनाय ॥ नालमहायमहि
तायमहाजनौघेकोलाहलेनसुकुतूहलिनिप्रवृत्ते ॥ ६ ॥ आविष्टवान
कुशलंपुरुषंप्रकृत्याप्रत्याययन्निजजनान्नितरामनृत्यत् ॥ उत्तुंगकेतु
शिखरेसकृतांगहारोरंगांतरेनटइवाखिलविस्मयात्मा ॥ ७ ॥ आभा
ष्यसोत्रजनतांशपथानुविद्धमुच्चैरिदंवचनमुद्धृतदोर्बभाषे ॥ उत्पत्स्यते
जगतिविश्वजनीनवृत्तिर्विश्वज्ञएवभगवानचिरादिहेति ॥ ८ ॥ सद्वी
पवारिनिधिसप्तकभूतधात्र्यामध्येपिकर्मभुविभारतनामखंडे ॥ काले
कलौसुविमलान्वयलब्धजन्मासन्मध्यगेहकुलमौलिमणिर्द्विजोभूत्
॥ ९ ॥ वेदाद्रिसद्रजतपीठपुरेश्वराभ्यांग्रामोविभूषिततरःशिवरूप्य
नामा ॥हेमाद्रिराजविभुराजदिलावृताभस्तस्याभवद्गुरुगुणःखलुमूल
भूमिः ॥ १० ॥ रामाधिवेशितहरिस्वसृमौलिमालाराजद्विमानागिधु

CC-0. Gurukul Kangri Collection, Haridwar

शोभितमध्युवास ॥ क्षेत्रंस्रपाजकपदंत्रिकुलैककेतुःकंयद्दधातिस
खलुविश्वपाजात् ॥ ११ ॥ अर्थकमप्यनवमंपुरुषार्थहेतुंपुंसांप्रदातुमु
चितामुचितस्वरूपां ॥ कन्यांसुवर्णलसितामिववेदविद्यांजग्राहविप्र
वृषभप्रतिपादितांसः ॥ १२ ॥ रेमेच्छयोपनिषदेवमहाविवेकोभ
त्तयेवशुद्धकरणःपरमाश्रिताल ॥ मिथ्याभिमानरहितःपरयेवमुक्त्या
स्वांनंदसंततिकृतासतयाद्विजेंद्रः ॥ १३ तस्यप्रभोश्चरणयोःकुलदेव
तायाःभक्तिबबंधनिजधर्मरतःसधीरः ॥ विज्ञातभारतपुराणमहारह
स्यंयंभट्टइत्यभिवदंतिजनाविनीतं ॥ १ ॥ गोविंदसुंदरकथासुधयास
नृणामानंदयन्नकिलकेवलमिंद्रियाणि ॥ किंतुप्रभोरजतपीठपुरेपदा
ब्जंश्रीवल्लभस्यभजतामपिदैवतानां ॥१५॥ इत्थंहरेर्गुणकथासुधयासु
तृप्तानैर्गुण्यवादिषुजनेष्वपिसाग्रहेषु॥ तत्वेसकालचलधीरतिसंशया

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

लुर्धीमान्धियंश्रवणैर[illegible]दध्यौ ॥ १६ ॥ त्रातायएवनरका
त्साहिपुत्रनामामुख्यावनंनसुलभंपुरुषादपूर्णात् ॥ तस्मात्समस्तवि
दपत्यमवद्यहीनंविद्याकराकृतिलभेमहिकैरुपायैः ॥ १७ ॥ पूर्वेपिक
र्दमपराशरपांडुमुख्यायत्सेवयागुणगणाढ्यमपत्यमापुः ॥ तंपूर्णस
द्गुणतनुंकरुणामृताब्धिंनारायणंकुलपतिंशरणंव्रजेम ॥ १८ ॥ इत्थं
विचिंत्यसविचिंत्यमनन्यबंधुःश्रेष्ठप्रदंरजतपीठपुराधिवासं ॥ भक्त्या
भवाब्धिभयभंगदयाशुभात्माभेजेभुजंगशयनंद्विषडब्दकालं ॥ १९ ॥
पत्न्यासमंभगवतःसभजन्पदाब्जंभोगान्लघूनपिपुनर्लघयांचकार
॥ दांतंस्वयंचहृदयंदमयांचकारस्वच्छंचदेहमधिकंविमलीचकार ॥
॥ २० ॥ तीव्रैःपयोव्रतमुखैर्विविधैर्व्रताद्यैर्जायापतीगुणगुणार्णवपु

त्रकामौ ॥ संपूर्णपूरुषमतोषयतांनितांतंदेवेरिताविवपुरादितिकश्यप
पौतौ ॥ २१ ॥ नाथस्यभूरिकरुणासुधयाभिषिक्तौश्रीश्रीधरप्रतति
सारशरीरयष्टी ॥ भूरिव्रतप्रभवदिव्यसुकांतिमंतौतौदेहशुद्धिमति
मात्रमथालभेतां ॥ २२ ॥ कांताहतौसमुचितेथबभारगर्भंसाभूसुरेंद्र
दुहिताजगतांसुखाय ॥ अच्छांबरेवरजनीपरिपूरिताशाभाविन्यपा
स्ततमसंविधुमाद्यपक्षात् ॥ २३ ॥ तंपूर्वपक्षसितबिंबमिवप्रवृद्धंयाव
द्विजेंद्रवनितासुषुवेत्रतावत् ॥ अंशेनवायुरवतीर्यसरूप्यपीठविष्णुं
प्रणम्यभवनंप्रययौतदीयं ॥ २४ ॥ संपूर्णलक्षणचणंनवराजमानद्वा
रांतरंपरमसुंदरमंदिरंतत् ॥ राजेवसत्पुरवरंभुवनाधिराजोनिष्कास
यन्परमसौभगवान्विवेश ॥ २५ ॥ संतुष्यतांसकलसन्निकरैरसाद्भिः
खिद्येतवायुरयमाविरभूत्पृथिव्यां ॥ आख्यान्नितीवसुरदुंभिमंद्रनादः

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राश्राविकौतुकवशैरिहमानवैश्च ॥ २६ ॥ नाथंनिषेव्यभवनानतिदू
रमाप्तःप्राज्ञोमहप्रकृतदुंदुभिनादपूर्वात्॥ पुत्रोद्भवश्रवणतोमहदाप्य
सौख्यंज्ञानंपरोक्षपदमप्यमतेष्टहेतुं ॥ २७ ॥ आविश्यवेश्मनिजनं
दनमिंदुवक्त्रंभूयोभिनंद्यसमुकुंददयांप्रवंद्य ॥ जातस्यतस्यगुणजात
वहस्यजातकर्मादिकर्मनिवहांविदधेसुकर्मा ॥ २८ ॥ ज्ञानार्थमेवयद
भूद्वसुदेवएषयद्वासुदेवपदभक्तिरतःसदासौ ॥ तद्वासुदेवपदमन्ववद
न्सुरेंद्रास्तातेनयन्निगदितंसुतनामकर्त्रा ॥ २९ ॥ पातुंपयांसिशिशवे
किलगोप्रदोस्मैपूर्वालयःस्वसुतसूनुतयाप्रजातः ॥ निर्वाणहेतुमल
भीष्टपरात्मविद्यांदानंध्रुवंफलतिपात्रगुणानुकूल्यात् ॥ ३० ॥ अत्र
स्तमेवसततंपारिफुल्लचक्षुःकांत्याविडंबितनवेंदुजगत्यनर्घ्यं ॥ तत्पुत्रर
त्नमुपगृह्यकदाचिदाप्तःस्वस्वामिनेबुधउपायनमर्पयत्स ॥ ३१ ॥ नत्वा

CC-0. Gurukul Kangri Collection, Haridwar

हरिंरजतपीठपुराधिवासंबालस्यसंपदमनापदमर्थयित्वा॥ साकंसुतेन
परिवारजनान्वितोसौप्रायान्निशीथसमयेनिजमेवधाम ॥ ३२ ॥ दो
षेयुषांसममनेनवनेतिभीमेतत्क्रीडितग्रहइहैकतमंतुतोद ॥ उद्भ्रांतरक्त
मवलोक्यतमभ्यधायिकेनाप्यहोनशिशुत्कथमेषइत्थं ३३ आविश्य
पूरुषमुवाचमहाग्रहोसावस्मद्विहारसमयोपगतान्समस्तान् ॥ यच्छ
क्तिगुप्तिरहितानलमस्मिहंतुंलोकेश्वरःसबतबालतमःकिलेति ॥३४॥
स्तन्येनबालमनुतोष्यमुहुःस्वधाम्नोमाताकदाचनययौविरहासहापि
॥ विश्वस्यविश्वपरिपालकपालनायकन्यांनिजामनुगुणांकिलभीरुरे
षा ॥ ३५ ॥ साबालकंप्ररुदितंपरिसांत्वयंतीमुग्धाक्षरेणवचसानुनि
नायमुग्धा ॥ मातातततातसुमुखेतिपुनःप्ररोदिमातालनोतिरुचितंत्व
रितंतवेति ॥ ३६ ॥ रोदक्रियासमभिहारतएववृत्तेपोतस्यमातरिचि

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रादपिनागतायां ॥ जग्राहबालमथचैक्षतमातृमार्गंसापिक्रियासम
भिहारतएवबाला ॥ ३७॥ कर्तव्यमौढ्यमभिपद्यनिरूप्यसातंप्राक्षो
जयत्खलुकलित्थकुलंप्रपक्कं ॥ शीतंपयोपिसततंपरिपाययंतीयस्यो
ष्णरोगमतिवेलमशंकतांबा ॥ ३८ ॥ नूनंपिपासुरतिरोदतिहंतबालो
धिङ्मांदयाविरहितांपरकृत्यसक्तां ॥ इत्याकुलागृहमुपेत्यतदाप्रसन्नं
पूर्णोदरंसुतमवैक्षतविप्रपत्नि ॥ ३९ ॥ पृष्ट्वावगम्यसकलंचततःप्रवृ
त्तंयूनांचदुःसहमिदंशिशुनोपभुक्तं ॥ इत्थंविचिंत्यतनयांबहुभर्त्संयं
त्याभीतंतयानुकुपितंमनसानुतप्तं ॥ ४० ॥ आरोग्यशालिनितदा
पिपुरेवपुत्रेविस्मेरतामुपजगामजनन्यमुष्य ॥ यस्यत्रिलोकजननी
जननीविषेपिपीतेनविस्मयमवापसमस्तशक्तेः ॥ ४१ ॥ स्तन्यंमुहुः
किलददौजननीगृहीताक्षेमायतंकिलदधज्जनकोजजाप ॥ अन्योज

CC-0. Gurukul Kangri Collection, Haridwar

नोपिकिललालयतिस्मकिंतुसर्वोपितन्मुखसुहासरसायनोक्तः ॥ ४२
देवादिसद्भिरनुपालितयादरेणदेव्यात्मनेवबिसलत्पदयानितांतं ॥
अव्यक्तयाप्रथमतोवदनेस्यवाण्याशालीनयेवभुवनार्चितयाविजिग्ये
॥ ४३ ॥ प्राग्रिंखणंस्वयमथस्थितिमेषचक्रेपश्चाद्गतिंपरिचयेनकि
लक्रमेण ॥ विश्वस्यचेष्टितमहोयदनुग्रहेणसर्वंतदस्यपवनस्यविडंबनं
हि ॥ ४४ ॥ पुच्छांतमच्छमवलंब्यकदाचिदेषःप्रातर्व्रजाद्व्रजतएवनिज
र्षभस्य ॥ प्रायात्प्रियस्यसहसास्वजनैरदृष्टोनानावनेषुचरतश्चरतस्तृ
णानि ॥ ४५ ॥ उत्तुंगशृंगलसितस्यमहिष्टमूर्तेःपादावृतावनितलस्य
सुरंध्रकस्य ॥ आश्रित्यतस्यशुशुभेवयवैकदेशंबालोदिवाकरइवोदय
पर्वतस्य ॥४६॥ लीलांकरोतिनुगृहांतरगोनुबालःकूपांतरेनुपतितःप्र
कृतिस्वतंत्रः ॥ इत्थंविचिंत्यसमुहुःस्वजनोविमृग्यहंतानवेक्ष्यतनयंह

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दितापमाप॥४७॥बालस्यबालपरिलंबनगोचरंतंतव्द्यश्वस्यतापिवच
नंवनगोचरोक्तं ॥ यत्सायमैक्षतजनःशिशुमाव्रजंतमेकाब्दकंवृषभबा
लकृतावलंबं ॥ ४८ ॥ चिंतामणींद्रमिवाचिंतितदंदरिद्रोविज्ञानमार्ग
मिवविष्णुपरंमुमुक्षुः ॥ नष्टंचनंदनमितिस्वजनोत्यलब्ध्वानाथस्यतस्य
तमनुग्रहमेवमेने ॥ ४९ ॥ लीलावसानसमयेसहसाकदाचिदार्योमु
नाभ्ययवद्दातिंप्रतिचोद्यमानः ॥ रोद्वैषनोस्तिधनिकोवृषविक्रयीतिप्रो
वाचनंदनमुखेंदुमवेक्ष्यमंदं ॥ ५० ॥ लीलाकरेणसकरेणसुकोमलेनबी
जांतराणिकिलकानिचिदाशुतस्मै ॥रुग्मिलार्भकोभिमतनिष्कपदेयदा
दादादत्ततानिधनिकोबहुमानपूर्वं ॥५१॥ लब्धंसुतादितिवदन्द्विजपुं
गवेनकालांतरेनिजधनेप्रतिदित्सितेपि ॥ साक्षादमानवनवाकृतितः
सलेभेबीजच्छलेनपुरुषार्थमहोविशिष्टं॥५२॥वासुदेवमिहवासुदेवता

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्कलामभिननंदतंजनः ॥ वासुदेवमितिवासुदेवसन्नामकंविविध
लीलमर्भकं ॥ ५३ ॥ इतिविहरतिमह्यांविष्णुदासोपिगूढेसमजनिसु
जनानांचित्तमानंदपूर्ण ॥उदयतिघनमालालीनभानौचभानौननुजन
नयनाब्जैर्लक्ष्यतेलंविकासः ॥ ५४ ॥ इतिश्रीमत्कविकुलतिलकत्रिवि
क्रमपंडिताचार्यसुतनारायणपंडिताचार्यविरचितेमध्वविजयेमहाका
व्येआनंदाङ्केद्वितीयःसर्गः ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
श्रीनृसिंहायनमः ॥ अथकदाचनसुंदरनंदनस्मितमुखेंदुदृशांदयितौ
नृणां॥महमितोनिजबंधुमुदेमुदाप्रययतुःस्वजनैःसहदंपती ॥ १ ॥ स्व
जनतापगमागमसंगमप्रतिसभाजितपूर्वकसंभ्रमे ॥ अविदुषीजननी
तिसबालकःशरणतोरणतोनिरगान्नृभिः ॥ २ ॥ क्वनुयियासिसितात
नसांप्रतंस्वजनसंत्यजनंतवसांप्रतं ॥ इतिविभुःपथिकैरुदितोव्रजन्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्मितमनाकुलमुत्तरमातनोत् ॥ ३ ॥ त्वरितमेत्यसकाननदेवतासद
नमत्रननामरमापतिं ॥ अपितत:प्रगतोलघुनारिकेल्युपपदांतरसद्म
गतंचतं ॥ ४ ॥ नलिननाभनिभालनसंमदागमविकस्वरभास्वरलोच
न:॥जनमनोनयनांबुजभास्कररोरजतपीठपुरंप्रययावसौ ॥ ५ ॥ सुह
यमेधगणातिशयालवोहरिनमस्कृतय:सुकृताइमा: ॥ इतिसुरैरपिभू
सुरमंडलै:समनमत्ससविस्मयमीक्षित: ॥ ६ ॥ नहिहरिंसततंन
नमत्यसौनचनपश्यतिनापिनवंदते ॥ अपितथेतिविधायविशेषत:
सननुसाधुजनान्समशिक्षयत् ॥ ७ ॥ अनवलोक्यसुतंसुतवत्स
लोमृगयातिस्ममहासुरपुंगव: ॥ मुहुरपृच्छदमुष्यगतिंनरान्पथिप
थिप्रगतोनुपदंद्रुतं ॥ ८ ॥ जनसदागातिसूचितवर्त्मनाप्रातिपदंव्र
जतापरयातृषा ॥ द्विजमहामधुपेनमनोहरंस्मितमलाभिसुतानन

CC-0. Gurukul Kangri Collection, Haridwar

वारिजम् ॥ ९ ॥ विरहदूनतयोद्गमनोन्मुखंन्यरुणदश्रुपुरासययोर्दृ
शोः ॥ अथतयोःप्रमदोत्थितमप्यदःप्रतिनिरुध्यगिरंगुरुरब्रवीत् ॥
॥ १० ॥ अयिसुतेदमुदाहरतत्वतोननुसमागतवानासिसांप्रतं ॥ स्व
जनताराहितस्यतुकोत्रतेसहचरोर्भकदीर्घतमेपथि ॥ ११ ॥ जनकवा
चमिमामवधारयन्नूकलमुदाहरदंबुरुहेक्षणः ॥ स्वपदमाव्रजतोव्रजतो
प्यतोननुसखाममकाननगोविभुः ॥ १२ ॥ तदितरायतनात्तुयदाग
संकृतनतिःखलुतत्रहरिःसखा ॥ अहमिहापिमहेंद्रदिगालयंप्रणत
वानुतयावदधीश्वरं ॥ १३ ॥ अपिततोहमुपेत्यसहामुनाभगवते
त्रसतेप्रणतिंव्यधां ॥ इतिनिगद्यविभातिशिशुस्मविस्मितसभाज
नचीर्णसभाजनः ॥ १४ ॥ विरहितस्वजनंचरणाप्रियंविविधभूतभयं
करवर्त्मनि ॥ अयिकृपालयपालयबालकंलघुशुभस्यममेत्यनर्मद्वि

Digitized by Arya Samaj Foundation Chennai and eGangotri

जः ॥ १९ ॥ तमुपगृह्यसुतंसुतपोनिधिर्गृहमसौगृहिणीसहितोययौ
॥ उदयतीतिहिबालदिवाकरेऽस्मितमभूत्सुजनाननवारिजं ॥ १६ ॥
वरविमानगिरावपिचंडिकाशिशुमहोजननीतमलालयत् ॥ अपरथा
परितुष्टमनःकथंचिरमिहैषवसेद्वसहायकः ॥ १७ ॥ सकलशब्दमयी
चसरस्वतीसततमानमतिस्वयमेवयं ॥ द्विजवरोथकदाचनमातृकः
किलसुतंपरिचाययतिस्मतं ॥ १८ ॥ लिपिकुलंननुतातगतेदिनेलि
खितमेवपुनर्लिखितंकुतः ॥ इतिनिजप्रतिभागुणभावितंहरिपदस्यव
चस्तमनंदयत् ॥ १९ ॥ शिशुरसौप्रतिभांबुधिरित्यलंजनमनोवचन
ग्रहपीडना ॥ नभवतादितितांविजनस्थलेस्वतनयंसमशिक्षयदेषकः
॥ २० ॥ महवतास्वजनेनसमीरितस्वजननीसहितेनकदाचन ॥ रु
चिरवाचनयार्चितवाक्श्रियाप्रतिययेप्रभुणाघृतवल्यपि ॥ २१ ॥ प

CC-0. Gurukul Kangri Collection, Haridwar

रिषदानितरांपरिवारितःशिवपदःकिलधौतपटोद्भवः ॥ इहकथाकथ
यन्ददृशेततःपृथुधियापृथुकाकृतिनामुना ॥ २२ ॥ इदमुवाचविचार
विचक्षणः शुचिवचःशनकैःसजनांतरे ॥ अपरथाकथितंकथकत्वयान
नुमतान्महतामितिसस्मितं॥२३॥अगणयन्नशिवंजनतातदासवचने
वसुदेवसुताऽह्वये ॥ मुखरमिच्छतिकोमृगधूर्त्तकंप्रकृतहुंकृतसिंऽह
शिशौसति ॥ २४ ॥ अथकथांकथयेतितदाजनेगदितवत्युचितार्थमु
दाहरत् ॥ ससमलाल्यतविस्मयिभिर्नरैरपिसुरैर्विजयांकुरपूजकैः
॥ २५ ॥सजननीसहितोजनकंगृहेप्रगतवांस्तमुदंतमवेदयत्॥निगद
तातशिवःकथकःसकिंवितथगोरथवाहमितीरयन् ॥ २६ ॥ ननुसु
तावितथंकथितंत्वयेत्यमुमुदीर्यसविस्मयमस्मरत् ॥ प्रकृतितःकृ
तिताखलुमेशिशोर्मदधिनाथदयोदयजेत्यसौ ॥ २७ ॥ कथयतांप्रथ

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेकथयत्यलंस्वजनकेजनसंघवृतेकथां ॥ सकललोकमनोनयनोत्सव
श्चतुरधीःसकदाचिदवाचयत् ॥ २८ ॥ विविधशास्त्रिपदार्थनिवेदनेलि
कुचनाम्नितदानुदितार्थके ॥ किमितिताततदर्थमवर्णयन्कथयसी
तिशनैरयमब्रवीत् ॥ २९ ॥ अवदतीतिपितर्यपिचोदितेप्रातिबुभुत्सु
षुतत्रजनेष्वपि ॥ अयमुदीर्यतदर्थमवाप्तवान्परिषदोह्यसमानसुमा
ननां ॥ ३० ॥ बहुविधैश्चरितैरितिचारुभिःसकललोककुतूहलकारि
णं ॥ द्विजवरेणवयस्युचितेऽस्छितंतमुपनेतुमनेनदधेमनः ॥ ३१ ॥ स
मुचितग्रहयोगगुणान्वितंसमवधार्यमुहूर्तमदूषणं ॥ प्रणयबंधुरबांध
ववानसौद्विजकुलाकुलमुत्सवमातनोत्॥ ३२॥विविधवेदतयाविजिहीं
र्षवोवदनरंगपदेस्यचिरायया॥ सुरवरप्रमदाअपिसप्रिया अभिननंदु
रहोवियतोमहं ॥३३॥विहितसाधनसाधितसत्क्रियोज्ज्वलनमुज्ज्वल

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धीर्ज्वलयन्नयं ॥ उपनिनायसुतंसमलंकृतंकुशलिनंकुशलीकृतशीर्षकं
३४परिचराग्निगुरूचरितव्रतःसुचरणःपठसाधुसदागमान् ॥ इतिगुरो
स्त्रिजगद्गुरुशिक्षणंस्फुटमाहासिसुरैःकृतसाक्षिभिः॥ ३५ ॥ जितकुमार
गुणंसुकुमारकंनिजकुमारमवेक्ष्यनिरंतरं ॥ समुचिताचरणेचतुरंस्वतः
क्षितिसुरोमुदमायतशिक्षयन् ॥ ३६ ॥ सपटखंडमकिंचनवत्क्वचित्स्व
विभवानुचितंचरणादिकं ॥ भुवनभर्तुरहोस्वनिगूहनंसुरसभासुकुतू
हलमातनोत् ॥ ३७ ॥ अविरलैर्गरलोष्मभिराकुलीकृतसमस्तज
नोविचचारयः ॥ क्वचिदमुंनिजिघांसुरशांतिमानुपससर्पससर्पमया
सुरः ॥ ३८ ॥ त्वरितमुद्यतविस्तृतमस्तकःप्रतिददंशयदैनमविक्षतं ॥
प्रभुपदारुणचारुतरांगुलीविहतिपिष्टतनुःप्रततामसः ॥ ३९ ॥ गरु
डतुंडमिवप्रतिपन्नवान्द्विजकुमारपदंसममारच ॥ समुचितंचरितंमह

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तामिदं सुमनसोमनसेष्टमपूजयन् ॥ ४० ॥ गिरिशगुर्वमरेंद्रमुखैश्च
यच्चरणरेणुरधारिसुराधिपैः ॥ क्षितिसुरांध्र्यभिवंदनपूर्वकंसविदधे
ध्ययनंछलमानुषः ॥ ४१ ॥ करतलेखलुकंदुकवत्सदासकलयाक
लयासहविद्यया ॥ अरिधरेणसमंस्फुरितंगुरोर्मनसितस्यविडंबयतो
जनान् ॥ ४२ ॥ अनधिकैरधिकैश्ववयस्यथोबहुभिरध्ययनोपरमांत
रे॥ अनिकटेबटुभिःपटुभिर्गुरोःसविजहारसुखीसखिभिःसमं ॥४३॥
पदमुदीर्यजवेनययासितंद्रुतसखेष्वभवत्सपुरःसरः ॥ अयमयत्नत
येतिनविस्मयोननुमनोजवजित्पवनोह्यसौ ॥ ४४ ॥ प्लवनतेजसिहं
तनकेवलंविजितवान्सतदासकलान्जनान्॥ प्रभुनिदेशकरोहनुमत्त
नौननुजिगायसवालिसुतादिकान् ॥ ४५ ॥ जलविहारपराजयिभिः
स्पृधासखिभिरीरितवारिपरिश्रितं ॥ वदनमाकुललोचनमादधेस्मि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तममुष्यहिकंचनविभ्रमं ॥ ४६ ॥ सशनकैर्बलिनोयुगपद्गतान्प्रविदृ
तेषुसखीन्निरपातयत् ॥ अशनकैर्युगपत्प्रकृताहवान्सहासितोद्विजसू
नुरयत्नवान् ॥ ४७ ॥ ग्रहणानिग्रहणेग्रहणेदृढेगुरुभरोत्धरणादिवि
धौपटौ ॥ इहविभावुपचारधियान्नृणामृतमयंननुभीमइतीरितं ॥४८॥
विहरतीतिपठत्यपिनस्फुटंस्वगृहगामिनिचाद्भुतमायति ॥ परितुतोष
नतत्रजगद्गुरौसकिलपूगवनान्वयजोद्विजः ॥ ४९ ॥ अथकदाचन
सोध्ययनांतरेतमवदत्कुपितोन्यमनास्विनं ॥ पठसिनोशठतेसखिभिः
समंकिमितिनित्यमुदासितधीरिति ॥ ५० ॥ गुणनिकाचरणादिकगो
चरानममहृदयितेत्युदितेमुना ॥ वदविशारदवादयथेप्सितंत्वमुपरीक्ष्य
वदत्धरणीसुरः ॥ ५१ ॥ सकललक्षणशिक्षणमूलभूःश्रुतिसमामन
नंस्खलनोज्झितं ॥ नखलुकेवलमस्यगुरोर्व्यधात्सुमनसामपितत्रकु

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तूहलं ॥ ५२ ॥ प्रियवयस्याशिरोगुरुवेदनामशमयत्सहजामपिदुःस
हां ॥ सविपिनेविजनेमुखवायुनाश्रवणगोचरितेनकदाचन ॥ ५३ ॥
अधिगतोपनिषच्चसकृच्छ्रुताप्रकटभागवतीतिनविस्मयः ॥अधिगता
ननुजात्वपिनश्रुताःप्रतिभयाश्रुतयःशतशोमुना ॥ ५४ ॥ साक्षाद
थोपनिषदोविभुरैतरेय्याःपाठच्छलेनविजनेर्थरसान्ब्रुवाणः ॥ अध्या
पकायवितताररविमोक्षबीजंगोविंदभक्तिमुचितांगुरुदक्षिणांसः ॥५५॥
अयिस्वामिन्दुष्टान्दमयदमयव्यक्तमचिराद्गुणान्गूढान्विष्णोःकथय
कथयस्वान्प्रमदयन् ॥ तदानंदंतन्वन्निंतिसुमनसांसोनुसरतामनु
ज्ञामादत्तत्रिभुवनगुरुर्ब्राह्मणगुरोः ॥ ५६ ॥ इतिश्रीमध्वविजयेमहा
काव्येआनंदांकेतृतीयःसर्गःसमाप्तः ॥ ॥ छ ॥ ॥ छ ॥

CC-0. Gurukul Kangri Collection, Haridwar

श्रीनृसिंहायनमः ॥ अथैषसल्लोकदयासुधार्द्रयासदागमस्तेनानिरास
कामया ॥ रमावरावासभुवाविशारदोविशालयाचिंतयदात्मनोधिया
॥ १ ॥ अनन्यसंगाद्गुणसंगिताहरेर्जनस्यमानंतुविशिष्टचेष्टितं ॥ अ
संगमस्मात्प्रकटीकरोम्यहंनिजंभजन्पारमहंस्यमाश्रमं ॥ २ ॥ म
मप्रभोर्नापरथाहिशोभतेद्विषत्सुविष्णुंयददंडधारणं ॥ हरिस्वसान्
न्वाचिरादसद्भिदेभवेदतोनास्मिचदंडधारकः ॥ ३ ॥ विचिंतयन्नि
त्थमनंतचिंतकःसमस्तसन्यासनिबध्दनिश्चयः ॥ असावनुज्ञार्थमथा
नमत्पर्धरिंसमस्तसंव्यापिनमात्मदायकं ॥ ४ ॥ निजेजनेकिंनमसीति
पृच्छातिब्रुवन्स्ववस्तुप्रणतिंव्यधामिति ॥ गुरोःकिलान्वेषणवान्जग
द्गुरुस्तदाजगामाखिललोकशिक्षकः ॥ ५ ॥ यतिर्यतात्माभुविकश्च
नाभवद्विभूषणोभूरिविरक्तिभूषणः ॥ ननाममात्राच्छुचिमर्थतोपियं

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनोच्युतप्रेक्षमुदाहरत्स्फुटं ॥ ६ ॥ पुरषकृष्णाकरसिद्धशुद्धिमद्दरा
न्नभुक्त्याकिलपांडवालये ॥ विशोधितात्मामधुकृत्नवृत्तिमांश्चचार
कांश्चित्परिवत्सरान्मुदा ॥ ७ ॥ अभूत्कुशास्त्राभ्यसनंनपातकंक्र
मागताद्विप्रतिसारतायतेः ॥ यथाकुशस्त्राध्यसनंमुरद्विपःपदांबुजे
व्याधवरस्यगर्हितं ॥ ८ ॥ विनीतमाम्नायशिरोविशारदंसदैवतत्वं
प्रबुभुत्सुमादरात् ॥ गुरुर्विदित्वोपगतांनिजाम्मृतिंकदाचिदूचेतमुप
व्हरंगिरं ॥ ९ ॥ अहंस्वयंब्रह्मनकिंचिदस्तिमत्परंविजृंभेतयदास्फु
टंचितिः ॥ इतीहमायासमयोपपादितंनिरन्वयंसुव्रतमास्मविश्वसीः
॥ १० ॥ यदेतदात्मैक्यमुपास्तिचोदितंनमेगुरोरप्यपरोक्षतांगतं ॥
पुरातनानामपिसौम्यकुत्रचित्ततोमुकुंदंभजसंविदेमुदा ॥ ११ ॥ इ
तीदमादिश्यवचोवचस्विनिस्वकेगुरौ लोकमथान्यमायुषि ॥ असेव

CC-0. Gurukul Kangri Collection, Haridwar

तालोच्चमुहुर्गुरोर्गिरंसरूप्यपीठालयमिंदिरावरं॥ १२ ॥ सुभक्तिना
तेनसभक्तवत्सलोनिषेवितस्तत्रपरंबुभुत्सुना ॥ भविष्यतःशिष्यवरा
द्विविद्धिमामितिप्रविष्टःपुरुषंतमभ्यधात् ॥ १३ ॥ प्रतीक्षमाणंतमनु
ग्रहंमुदानिषेवमाणंपुनरंबुजेक्षणं ॥ सतांगुरुःकारणमानुषाकृतिर्यातिं
प्रशांतंतमुपाससादसः ॥ १४ ॥ सुतंयतींद्रानुचरंविरागिणंनिशम्य
सन्यासनिबद्धमानसं ॥ सुवत्सलौरूप्यतलालयस्थितंवियोगतांतौ
पितरौसमीयतुः ॥ १५ ॥ वराश्रमस्तेजरतोरनाथयोर्नजीवतोःस्या
दयिनंदनावयोः ॥ सयाचनंवाक्यमुदीर्यतावितिदंपरीत्यपुत्रायनतिंवि
तेनतुः ॥ १६ ॥ नतिर्नशुश्रूषुजनायशस्यतेनतंभवद्भ्यांस्फुटमत्रसांप्रतं
॥ अहोविधात्रास्वयमेवदापितातदभ्यनुज्ञेतिजगादसप्रभुः ॥ १७॥
अनुत्तरज्ञःसतमर्थयन्पुनर्यतींद्रमानम्यगतःप्रियायुतः॥ गृहेवसन्क

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ल्पसमान्क्षणान्नयन्सुताननैंदोरनिशंततोस्मरत् ॥ १८॥ सचिंतय
न्पुत्रमनोरथंशुचापुनश्चतीर्त्वोपगतोमहानदीं॥ यतीश्वरानुव्रतमात्म
नंदनंतमैक्षतग्रामवरेमठांतरे ॥ १९ ॥ सजातकोपाकुलितोधरासुरो
महात्मनांलंघनभीरुरप्यलं॥ सुतस्यकौपीनधृतौहिसाहसप्रतिश्रवो
मेदृढइत्यभाषत ॥ २० ॥ क्षणेनकौपीनधरोनिजंपटंविदार्यहेतातकु
रुष्वसाहसं ॥ इतीममुक्त्वाविभुरब्रवीत्पुनःशुभांतरायंनभवांश्चरेदि
ति ॥ २१ ॥ नपुत्रपित्रोरवनंविनाशुभंवदंतिसंतोननुतौसुतौमृतौ
॥ निवर्तमानेनहिपालकोस्तिनौत्वयीतिवक्तारममुंसुतोब्रवीत् ॥ २२
यदाविरक्तःपुरुषःप्रजायतेतदैवसन्यासविधिःश्रुतौश्रुतः ॥ नसंगही
नोपिपरिव्रजामिवामहंतुशुश्रूषुमकल्पयन्निति॥२३॥ बहुश्रुतत्वाद्यदि
तत्सहेबलान्नसासावित्रीविरहंसहेतते ॥ इतिद्विजेनाभिहितेनमत्सतं

CC-0. Gurukul Kangri Collection, Haridwar

भवाननुज्ञांप्रददाविितिब्रुवन् ॥ २४ ॥ विचिंत्यविद्वान्सनिरुत्तरीकृत
स्तथास्तुमातानुवदेद्यदीतितं ॥ उदीर्यकृच्छ्रादुपगम्यमंदिरंप्रियासका
शेतमुदंतमब्रवीत् ॥ २५ ॥ निशाचरारेरिवलक्ष्मणःपुराद्वृकोदरस्ये
वसुरेंद्रनंदनः ॥ गदोथशौरेरिवकर्मकृत्प्रियःसुभक्तिमान्विश्वविदोनु
जोभवत् ॥ २६ ॥ कदाचिदाप्यालयबुद्धिरालयंनिवेदयन्पालकमे
नमेतयोः ॥ द्दढंस्वसन्यासनिषेधनिश्चयंधवानुमत्येदमुवाचमातरं ॥
॥ २७ ॥ वराश्रमाप्तिंममसंवदस्वमांकदाचिदप्यंबयदीच्छसीक्षितुं ॥
यदन्यथादेशमिमंपरित्यजन्नजातुदृष्टेर्विषयोभवामिवः ॥ २८ ॥ इ
तिब्रुवाणेतनयेकदाचिदप्यदर्शनंतस्यमृतेर्निदर्शनं ॥ विचिंत्यपर्याकु
लिताचिकीर्षितंसुतस्यकृच्छ्रान्न्यरुणन्नसाशुभा ॥ २९ ॥ अथोपगम्यै
षगुरुंजगद्गुरुःप्रसाद्यतंदेववरप्रसादितः ॥ सदासमस्ताश्रमभाक्सुरे

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इवरोविशेषतःखल्वभजद्वराश्रमं ॥ ३० ॥ क्रियाकलापंसकलंसका
लविद्विधानमार्गेणविधायकेवलं॥सदाप्रसन्नस्यहरेःप्रसत्तयेमुहुःसम
स्तन्यसनंसमभ्यधात् ॥ ३१ ॥ अनंतमात्रांतमुदाहरंतियंत्रिमात्रपू
र्वंप्रणवोच्चयंबुधाः ॥ तदाभवद्भाविचतुर्मुखाकृतिर्जपाधिकारीयतिरस्य
सूचितः ॥ ३२ ॥ गुणानुरूपोन्नतिपूर्णबोधइत्यमुष्यनामद्विजवृंदवंदि
तः ॥ उदाहरद्भूरियशाहिकेवलंनमंत्रवर्णःसचमंत्रवर्णकः ॥ ३३ ॥
निरंगरागंमुखरागवर्जितंविभूषणंविष्टपभूषणायितम् ॥ अमुंधृताषाढ
मवेक्ष्यमेनिरेस्वभावशोभानुपमातिजंतवः ॥ ३४ ॥ भुजंगभूतेशविहं
गपादिकैःप्रवंदितःसावसरप्रतिक्षणैः ॥ ननामसोयंगुरुपूर्वकान्यती
नहोमहीयोमहतांविडंबनं ॥ ३५ ॥ वराश्रमाचारविशेषशिक्षणंवि
धित्सुरस्याचरितंनिशामयन् ॥ विशेषशिक्षांस्वयमाप्यधीरधीर्यती

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वरोविस्मयमायतांतरं ॥ ३६ ॥ सरोप्यपीठालयवासिनेयदाननाम
नाथायमहामतिर्मुदा ॥ तदामुनाग्राहिनरप्रवेशिनाभुजेभुजेनाशुभु
जंगशायिना ॥ ३७ ॥ चिरात्सुतत्वंप्रबुभुत्सुनात्वयानिषेवणंमेयद
कारितत्फलं ॥ अमुंददामीत्यभिदायसोमुनातदाप्रणीयप्रददेच्युता
त्मने ॥ ३८ ॥ अनुग्रहंतंप्रतिगृह्यसादरंमुदात्मनात्तांकृतकृत्यतांस्म
रन् ॥ अभूदसंगोपिसतत्सुसंगवान्सुसंगभूपाननुसाधुसंगिता ॥ ३९
यियासतिस्वस्तटिनींमुहुर्मुहुर्नमत्यनुज्ञार्थिनिभूरिचेतसि ॥ तमस्मर
त्स्वामिनमेवदूनधीर्गुरुर्भविष्यद्विरहाग्निशंकया ॥ ४० ॥ इतस्तृती
येदिवसेद्युनिम्नगात्वदर्थमास्माकतटाकमाव्रजेत् ॥ अतोनयायाइति
तंतदावदत्प्रविश्यकंचित्करुणाकरोहरिः ॥ ४१ ॥ तदाज्ञयोपागत
जान्हवीजलेजनोत्रसस्नौसहपूर्णबुद्धिना ॥ ततःपरंद्वादशवत्सरांतरेस

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दाव्रजेत्सातदनुग्रहांकिनी ॥ ४२ ॥ गतेदिनानांदशकेसमासकेवरा
श्रमंप्राप्यसपत्रलंबनं ॥ जिगायजैत्रान्बहुतर्ककर्कशान्सवासुदेवा
व्हयपंडितादिकान् ॥ ४३ ॥ गुरोःस्वशिष्यंचतुरंचिकीर्षतःप्रचोदना
च्छ्रोतुमिद्धोपचक्रमे ॥ अथेष्टसिद्धिश्छलजातिवारिधिर्निरादरेणापिम
हात्मनामुना ॥ ४४ ॥ तदाद्यपद्यस्थमबद्यमंडलंयदावदत्षोडशक
द्वयात्मकं ॥ उपर्यपास्तंतदितिब्रुवत्यसौगुरौतमूचेप्रणिगद्यतामिति
॥ ४५ ॥ भवत्प्रवक्तृत्वसमर्थतानमेसकोपमित्थंब्रुवतिव्रतीश्वरे ॥ अ
पीहमायासमयेपटौनृणांबभूवतद्दूषणसंशयांकुरः ॥ ४६ ॥ बुधोभि
धानंश्रवणंबुधेतरोध्रुवंविदध्याद्धिमुमुक्षुरात्मनः॥यतिर्विशेषादितिलो
कचोदनात्प्रवक्तिमायासमयंस्मपूर्णधीः ॥ ४७ ॥ अखंडितोपन्यस
नंविसंशयंससंप्रदायंप्रवचोदृढोत्तरं ॥ समागमन्श्रोतुममुष्यसाग्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हाःजनाःश्रुताढ्याश्चतुराबुभूषवः ॥ ४८ ॥ गुरोरुपांतेश्रवणेरतैर्द्वि
जैःसपंचषैर्भागवतेकदाचन ॥ बहुप्रकारेर्लिखितेतुवाचितेप्रकारमेकं
प्रभुरभ्यधादृढं ॥ ४९ ॥ परप्रकारेष्वपिसंभवत्सुतेविनिर्णयोस्मिन्
कथमित्युदीरिते ॥ मुकुंदबोधेनमाहाहृदब्रवीत्प्रकारमेनंभगवत्कृतं
स्फुटं ॥ ५० ॥ निगद्यतांगद्यमिहैवपंचमेजगद्गुरोर्वेत्थकृतिस्थितिं
यदि ॥ इतिब्रुवाणेयतिसत्तमेस्वयंतदुक्तमार्गेणजगादभूरित्द्वत् ॥
५१ ॥ अशेषशिष्यैश्चतदाज्ञयातदापरीक्षणायैक्षिसमस्तपुस्तकं ॥
सतत्रहंतैकतमेस्थितंत्यजन्नतावदध्यायनिकायमभ्यधात् ॥ ५२ ॥
अत्रजन्मनिनयत्पठितंतैर्जैत्रभातिकथमित्यमुनोक्ते ॥ पूर्वजन्मसुहि
वेदपुरेदंसर्वमित्यमितबुद्धिरुवाच ॥ ५३ ॥ इतिबहुविधविश्वाश्चर्य
चित्तप्रवृत्तेर्जगतिवितातिमायन्नूतनाप्यस्यकीर्तिः ॥ क्षपिततततमस्का

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भास्करीवप्रभालंसुजनकुमुदवृंदानंददाचंद्रिकेव ॥ ५४ ॥ ॥ छ ॥
इतिश्रीमध्वविजयेमहाकाव्ये नारायणपंडिताचार्यविरचितेआनंदां
केचतुर्थःसर्गः ॥ ४ ॥ ॥ छ ॥ ॥ छ ॥
श्रीनृसिंहायनमः वेदांतविद्यानिजराज्यपालनेसंकल्प्यमानोगुरुणा
गरीयसि ॥ अदभ्रचेताअभिषिच्यतेपुरासवारिभिर्वारिजपूरितैरथ
॥ १ ॥ आनंदरूपस्यपरस्यपात्रधीरानंदसंदायिसुशास्त्रकृत्सयत् ॥
आनंदतीर्थेतिपदंगुरूदितंबभूवतस्यात्यनुरूपरूपकं ॥ २ ॥ कदाचि
दत्रोपययौयतिःसखागोविंदबुद्धेर्बहुशिष्यसंवृतः ॥ अमुष्यशिष्याअ
नुमानशिक्षितास्तदाजिगीषन्गुरुबुद्धिमुद्धताः ॥ ३ ॥ भिदासुसाध्येत्य
नुमानमत्रतैःप्रायुज्यताशुप्रतिपक्षभीषणं ॥ अखंडयव्द्यक्तमखंडधीरि
दंसपक्षदक्षःफणिनंविराडिव ॥ ४ ॥ अथापिमिथ्याविमतंमतत्वतो।

CC-0. Gurukul Kangri Collection, Haridwar

विवादनिर्मुक्तवदित्यवादितैः ॥ अनेनसत्यंविमतंमतत्वतोयथाघटा
दीत्यनुमान्यगद्यत ॥ ५ ॥ हेतोरतिव्याप्तिरवादितैर्यदासकौतुकैस्तू
र्णमसावविस्मयः ॥ नशुक्तिरूप्यादिमतंयदन्यथामतंतदित्यादिव
दन्जिगायतान् ॥ ६ ॥ तत्वेप्यतत्वेविमतेनुमांवदन्तदप्रतिष्ठांप्र
तिपादुकःस्वयं ॥ विजित्यविश्वान्विदुषःसभास्वसौजगामनाम्ना
प्यनुमानतीर्थतां ॥ ७ ॥ समस्तवादींद्रगजप्रभंगदक्ष्वरन्नवन्यांप्रति
पक्षिकांक्षया ॥ वेदद्विषांयःप्रथमःसमाययौसवादिसिंहोत्रसबुद्धिसा
गरः ॥ ८ ॥ तस्योरुदुर्गर्ववतोजिगीषयानिशातमादत्तमुकुंदधीर्द्रुतं ॥
स्वशिष्यहस्तेनमठांतरेषुधेःसुपक्षदक्षंसुखतीर्थमार्गणं ॥ ९ ॥ जैत्रंप्र
जिज्ञासुकुतूहलाकुलंनृणांकुलंप्रत्वरितंनिशामयन् ॥ अवंदतोपेत्यगु
रुंगरिष्ठधीःसरूप्यपीठायतनोत्तमस्थितं ॥ १० ॥ सवादिसिंहस्य

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गिरंगरियसीमखंडयत्पंडितमंडलांतरे ॥ तीक्ष्णेनवाक्येनमितेनवेगि
नागदांशरेणेवविशारदोमुहुः॥ ११॥ असावसूयन्द्विनवप्रकारतोऽय
चीक्लृपत्कंचिदथार्थमुच्चकैः ॥ जगद्द्विजेतुश्चजयेससंशयस्तावज्जनो
जायतपूर्णचेतसः ॥ १२ ॥ विकल्पकोटीरथखंडयन्द्रुतंरेजेधिकंस्मे
रमुखोबृहन्मतिः ॥ तमस्ततीर्वाद्युमणिर्विशुद्धयागवाश्रितोविष्णुपदं
सदाश्रयं ॥ १३ ॥ अगाधमात्मन्यातिवेलमुद्धतंतिरस्कृताशेषसरस्व
तीतातिं ॥ कामंमहामानसकुंभसंभवोलघूचकारेत्यपिबुद्धिसागरं ॥
॥ १४ ॥ श्वएववादोस्त्वितिवादिनौखलावद्योत्तरंभातियदीर्यतामि
ति ॥ मध्वेब्रुवाणेमततौजितौजनःसनिश्चकायाथनिशापलायनात्
॥ १५ ॥ बुद्ध्यब्धिनावादिवरेणचार्जितांजयश्रियंभूपरिवर्तिनाचिरा
त् ॥ अहोमुहूर्तादयमप्रयत्नवानवाप्तवानित्यतिविस्मितंजनैः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४६,८८६

॥ १६ ॥ व्याख्यनूकदाचिन्मणिमद्विनिर्मितंभाष्यंजनैस्तर्कविशार
दैर्वृतः ॥ उवाचवाचंपरिहासहासवान्संमोदतीर्थःसुरमोददायिनीं ॥
॥ १७ ॥सत्सूत्रभावेप्रविचारितेपृथग्भाष्याभिसंधौचविशुद्धबुद्धिभिः
॥ निगृत्यगूढाग्रहमुग्रमेतयोर्मान्योन्वयोन्योन्यमहोनदृश्यते ॥१८॥
इतिब्रुवाणेप्रतिपादयत्यलंभाष्येत्रदोषान्प्रबलान्मुहुर्मुहुः ॥ तस्मिंस्तु
विस्मेराधियोपियत्नतोनस्थेयसःपर्यहरन्निमानमी ॥ १९ ॥ नन्वस्य
सूत्रस्यपरोर्थउच्यतांयद्भाष्यमात्रंभवतानिरस्यते ॥ भवादृशैर्यःकवि
भिर्नदूष्यतेकथंचनेत्यूचुरिमेवचस्विनः ॥२०॥ अक्लिष्टशब्दान्वयमेष
संभवत्सूत्रार्थमुच्चैर्वचनंतदाददे॥ मानीकृताम्नाययुतस्मृतिक्षणादेष्य
त्कथाताडवसूत्रधारकं ॥ २१ ॥ बुभुत्सयामत्सरवर्जितान्जनान्सम
त्सरान्वाविजिगीषयागतान् ॥ श्रुतप्रवीणानतितार्किकान्मुहुर्भंग्या

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नयाभंगमुपानिनायसः ॥ २२ ॥ कदाचिदेनंप्रतिगम्यसौम्यधीःस
मध्यगेहार्यवरःप्रसेदिवान् ॥ हेतोःकुतश्चिद्धिमनीकृतोप्यहोगणाब्धि
लुब्धःसुजनःप्रसीदति ॥ २३ ॥ तेजोमृतंनंदनगात्रपात्रगंनेत्रांजलि
भ्यामपिबत्सदाव्ययं ॥ विद्यासुधांचास्यवचोमहाघटेपूर्णामसौकर्णपु
टेनपंडितः ॥ २४ ॥ लीलाविवादेगुरुणाजगद्गुरोःप्रसंगतस्तत्रचता
दृशेसति ॥ सूत्रार्थविच्चेत्कुरुभाष्यमंजसेत्याक्षेपपूर्वंगुरुरभ्यधादिमं
॥ २५ ॥ विधानमात्रंतदुपाददेतदापयोयथाच्छंपरमःसहंसराट् ॥
तल्लीनमाक्षेपमुपैक्षताफलंवारीवसंतोहिगुणांशतोषिणः ॥ २६ ॥ वै
राग्यवैय्यात्यसुवाक्पूर्वकैर्युक्तोगुणैःपारमहंस्यभूषणैः ॥ ज्येष्ठोयति
र्योलिकुचान्वयोद्भवस्तंभूरिभक्तिःसकदाचिदब्रवीत् ॥ २७ ॥ विरो
धिवेदांतकृतांतसंपदांभाष्यादिकंचेदिदमस्तुकाक्षतिः ॥ अस्मभ्यमा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्ष्वविचक्षणोचितंभावंतुसूत्रोपनिषद्विवक्षितं ॥२८ ॥ इत्यस्यवाचा
शरदेवभासितायदाखिलाशाशुभपूर्णयाबभौ ॥ प्रमोदतीर्थाननचंद्र
चंद्रिकाव्याख्याभिधाविष्णुपदप्रकाशिनी ॥ २९ ॥ जेष्यन्कदाचि
त्किलकालपालितांदिशंप्रयातोच्युतबुद्धिनासह ॥ समग्रधीर्मंडितवि
ष्णुमंगलंविष्णुंजगन्मंगलमाननामसः ॥ ३० ॥ भिक्षाप्रदात्रात्रपरी
क्षितुंमुहुर्दत्तेप्रभुक्तेकदलीफलोच्चये ॥ अनेननिर्यत्नमवार्यविस्मय
स्तमार्यवर्यंविजनेवदद्गुरुः ॥ ३१ ॥ भिक्षावसानेद्विशताधिकैःफलै
र्व्यूढैःप्रभुक्तैःपरिपूरितेपिते ॥ तनूदरेनास्तिगरिष्ठताकथंसुचित्तसत्यं
वदताद्भवानिति ॥ ३२ ॥ अंगुष्ठमात्रंजठरेप्रतिष्ठितंजाज्वल्यमानंस
मजातवेदसं ॥ नित्यंहितंविश्वदहंचवित्ततंविश्वेशचेताइतिसोब्रवीत्त
दा ॥ ३३ ॥ पर्याकुलानेकसरस्वतीततीन्यायोपपन्नान्विविधार्थसंयु

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तान् ॥ अतीत्यदेशान्समयांश्चचारुधीरसौजगामाभिमतेनवर्त्मना
॥ ३४ ॥ स्वहेलयापातितपार्थिवव्रजांघ्रीशुद्धिदांकेरलभूषणायितां ॥
पयस्विनींप्रेक्ष्यपथिद्विजार्चितांसभाविनीमस्मरदत्रचंडिकां ॥ ३५ ॥
ततःक्रमेणप्रचलन्नुपेयिवानवंदतेंदीवरसुंदरच्छविं ॥ अंभोजनाभंसभु
जंगशायिनंश्रीवल्लभंश्रीमदनंतसत्पुरे ॥ ३६ ॥ वेदांतसूत्राणिकृतांत
वित्तमोव्याख्यादसौशिष्यगुणायसंसदि ॥ विलक्षणंजीवगणाद्गुणा
र्णवंब्रह्माच्युताख्यंप्रतिपादयन्मुहुः ॥३७॥ अग्रांशुनूत्नोपपदाधिवा
सजःससंकरोवैरपरायणःपुनः ॥ असूययोचेत्रमहानतिक्रमःसूत्रार्थ
वादोकृतभाष्यकोष्विति ॥ ३८ ॥ वेदोत्तरंभातियदीहकुर्महेभाष्यंकृ
तिर्नास्यहिदंडवारिता ॥ जगद्गुरूणामितितांगुरोर्गिरंजनःसमस्तोभि
ननंदसस्मितां ॥ ३९ ॥ प्राज्ञैर्महापूरुषसर्वलक्षणैःसंपन्नदेहोयमिती

CC-0. Gurukul Kangri Collection, Haridwar

रितिप्रभौ ॥ परेपरस्याप्यतिपीनतादृशःस्फिङ्मात्रसंशंसनमत्रचाक्रि
रे ॥४०॥ स्फिग्दूषणानिप्रतिपादयत्यलंसंपूर्णसंख्येस्यतुलक्ष्मशास्त्र
तः ॥ तद्दंडसंखंडनसंश्रवंव्यधात्तदक्षमोसौप्रकृतिर्हिंसासतां ॥४१॥
स्नात्वात्रतीर्थेष्वचिरेणकन्यकातीर्थेसुतीर्थेसुखतीर्थआप्लुतः ॥ समुद्र
सेतौचनिमज्यविष्णवेश्रीरामनाथायनमश्चकारसः ॥ ४२ ॥ तमात्र
जंतंयतिवेषमासुरंदंडंप्रकाश्यैषहसन्नभाषत ॥ खंडश्चेतदंडोयादिचंड
नत्वयात्वंषंढकोपंडितवंध्यवागिति ॥ ४३ ॥ लज्जानतःस्वार्थमथार्थयन्न
सन्नुपेक्षतासौद्विजनायकैस्तदा ॥ आनंदयंतंवदनेंदुनाजगत्तंद्वेष्टिकः
प्राज्ञमिहेतिवादिभिः ॥४४॥ यायाःप्रसक्ताःपरिषत्सुपूरुषैर्विद्याविदि
ग्धैर्विविधैःसमागमे ॥ सतासुतासुप्रतिभातिभासुरोविद्यासुविद्याधि
पतिर्जिगायतान् ॥ ४५ ॥ अचाल्यमानःसगुरुःसचापलैरसज्जनाना

Digitized by Arya Samaj Foundation Chennai and eGangotri

मबलीयसामिह ॥ उवासमासांश्चतुरोमहामनाःसिंहोगुहांतोपगतः
शुनामिव ॥ ४६ ॥ शृंगारसिंधुंसभुजंगशायिनंश्रीरंगवासंकृतमंगलं
सतां ॥ अमंदधीर्देवमवंदतागतःकवेरकन्याहिमवायुसेवितं ॥४७ ॥
ततोनिवृत्तःपरमेवपूरुषंप्रणम्यनानायतनेषुसंचरन् ॥ प्रकाशयन्स्वा
तिशयानमानुषानाशामुदीचींप्रययावसौक्रमात् ॥ ४८ ॥ ततस्ततो
विस्मितलोचनैर्नरैर्निरीक्ष्यमाणोतिसुलक्षणाकृतिः ॥ ग्रामोत्तमान्प्रा
प्यपयस्विनीतटेविवेशदेवायतनंसकिंचन॥ ४९ ॥ अधीत्यधर्मेणषडं
गमागमंतदर्थसंवर्णनानिर्णयान्विताः ॥ प्रापुर्द्विजेंद्रास्तमपूर्वपूरुषंजि
ज्ञासवःसुप्रथितंजगत्त्रये॥५०॥सुस्मितेंदुमरविंदलोचनंस्वर्णवर्णमति
भद्रभाषणं॥वीतभूषमपिविश्वभूषणंतंददृक्षुरलमापतज्जनः॥ ५१ ॥
विद्योरुद्युतिधीरतारकातिरस्कारेपतंगायितोदुर्वादीभकुतर्ककुंभदल

CC-0. Gurukul Kangri Collection, Haridwar

नेसिंहप्रबर्हायितः ॥ लोलालोककलोकदृक्कुमुदिनीसंल्हादनेन्दायि
तःसंसन्मंडलमंडनायितवपुःस्वानंदतीर्थोबभौ ॥ ५२ ॥ इतिश्रीम
त्कविकुलतिलकत्रिविक्रमपंडिताचार्यसुतनारायणपंडिताचार्यविर
चितेश्रीमत्सुमध्वविजयेमहाकाव्येआनंदांकेपंचमःसर्गः ॥ ५ ॥ ॥
श्रीनृसिंहायनमः ॥ श्री ॥ ऐतरेयमथकिंचनसूक्तंसूचयन्सदसितत्र
गरिष्ठः ॥ श्रोतुमिच्छतिसभाभगवद्भ्यःसूक्तभावमितितावदुवाच ॥१॥
वर्णसौष्ठवगरिष्ठमतूर्णंतुल्यमात्रमतिमात्रसुलक्ष्म ॥ व्यूढहृज्जलदघो
षममुष्योच्चारणंविदधदभ्यधितार्थं ॥२॥ लक्षणान्विततयावचनेस्मि
न्देवतागुरुमसावतिशेते ॥ मानमित्यपिविधायधियातेतत्तुसूक्तमपरा
र्थमवोचन् ॥ स्यात्तथेत्थमपिसंभवितार्थत्र्यर्थतांश्रुतिषुवित्तदशार्थं ॥ ॥२४॥
भारतंननुशतार्थमतिस्याद्वैष्णवंपदसहस्त्रतयांहि ॥ ४ ॥ इत्युदीरय

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिविस्तृतचित्तेभूसुराइहजिगीषवएनं ॥ ऊचुरर्थशतकंहरिनाम्नांवर्ण्य
तामितिसहासमुखास्ते ॥ ५ ॥ वर्णयामितदहंसकलंवः सौष्टवादनुव
दंतुभवंतः ॥ तंवदंतमितितेथवदंतोबाढमित्यतिदृढोद्यममापुः ॥ ६ ॥
प्रत्ययप्रकृतिसंगमभंगींशब्दशास्त्रविहितांप्रतिदृश्य ॥ शुद्धधीःश्रुति
शिरःशतसिद्धानध्यधात्सपदिविश्वपदार्थान् ॥ ७ ॥ यावदर्थशतकं
नविशंकःसंततोक्तिकृदपूरयदेषः ॥ वर्णितावधृतिदुर्बलचित्तास्तावदा
कुलहृदोह्यभवंस्ते ॥ ८ ॥ सांगवेदचतुराइतिहासेशिक्षिताःसुबहवो
प्यतिधृष्टाः ॥ नैतदीरितमहोजगृहुस्तेविश्वसंक्षयपयोधुगणावा ॥९॥
देवतास्वसुलभाप्रतिभातेमानुषेषुचपलेषुकथाका ॥ क्षाम्यसौम्यसक
लज्ञनमस्तेतेब्रुवंतइतितंकिलनेमुः ॥ १० ॥ वेदशास्त्रचतुरैरिहवि
द्यावित्तलिप्सुभिरवाप्तमशेषैः ॥ प्रापकेरलसुमंडलजातैरन्यदायत

CC-0. Gurukul Kangri Collection, Haridwar

नमायतचेताः ॥ ११ ॥ कर्ततंत्रकुशलानपिपुंसश्चर्करीतिबतसोयम
मानान् ॥ मानमानमयतीहकथंनोनैषमंडलभुवांसमितानां ॥ १२ ॥
मंत्रयंतइतितेद्विजवर्याअन्यदेशजमुखास्तमपृच्छन् ॥ सद्ददाददसु
शंसननिंदाकारिसूक्तगतमर्थमुपेत्य ॥ १३ ॥ तंस्फुटंप्रकटयन्सपृर्णा
याच्छब्दमूलमवदत्पृणधातुं ॥ तांजिगीषुमथविप्रमदः श्रीड्धातुमेषानि
गदंतमुवाच ॥ १४ ॥ प्रादिभेदमविदन्गुणयत्वंमूढपांसुषुलिखन्
लिपिसंघं ॥ भर्त्सयन्निनितिजहाससुहासोमत्सराकुलधियोजडयन्सः
॥ १५ ॥ तत्प्रसंगबलतोखिलविद्यापाटवंपृथुहृदः प्रतिबुध्य ॥ आन
मन्सबहुमानममीतंयंनमंतिकिलनाकिनिकायाः ॥ १६ ॥ कन्यका
द्दतसुरेंद्रवपुः श्रीदानवाचिवरसूक्तहृदुक्तौ ॥ कुत्रचित्सदासितावदपा
लार्कीतितातितरुणीत्ययमूचे ॥ १७ ॥ श्वित्रिणीभवतितत्पदवाच्ये

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्याग्रहेणवदतोविदुषोत्र ॥ कश्चिदेष्यातिविपश्चिदिहैनंपृच्छतेत्ययम
गच्छदथोक्त्वा ॥ १८ ॥ देशमेनमचिरादुपयातस्तादृशाकृतिरहोकृतबु
द्धिः ॥ तांस्तथाभ्यधिततत्पदभावंसूरिमौलिमणिनात्रयथोचे ॥ १९॥
॥ केवलंनसकलाःश्रुतिविद्यामानपूर्वकसमस्तगिरोस्य ॥ अप्यनाग
तगतप्रतिपत्तिंश्रद्दधुःपृथुलचेतसएते ॥ २० ॥ यद्यदेवसपदिप्रकृतं
स्यात्तत्तदेपयदवेदाखिलंच॥ सर्वदासदसिसर्वबुधानांसर्वविद्यातिरिति
प्रथितोभूत् ॥ २१ ॥ अप्रयातमपिदेशमशेषंव्यानशेसुजनकैरवबंधुः
पूर्णदृक्प्रततयानिजकीर्त्यापूर्णचंद्रइवचंद्रिकयालं ॥ २२ ॥ सुंदरेषु
सुरमंदिरवृंदेष्विंदिरारमणवंदनकृत्यं ॥ आचरन्नसचिरात्सुविचारो
रौप्यपीठपतिमापमुकुंदं ॥ २३ ॥ भूसुरप्रवरबुद्धिसमृद्धिव्यक्तयुक्तव
पुषंरुचिरांगीं ॥ सूत्रदीप्तमणिमालिकयालंभूषितांभुवनभूषणभूतां

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ २४ ॥ पादसुंदरपदक्रमभावैर्भासितांप्रकटवर्णगुणाढ्यां ॥ भार
तोत्तमभृतामनुरूपाछादनांसमाधिकस्वरशोभां ॥ २५ ॥ राजसूयमु
खसन्मखवृत्तांवासुदेवगुणनिष्ठितभावां ॥ सर्वधर्मपरिशिक्षणदक्षांवं
दितांजनतयाजननीवत् ॥ २६ ॥ मौलिसंग्रहविकर्षणदूनांमायिना
सदसिदुष्टजनेन ॥ न्यायमार्गमपहायमहांतंस्वेश्वरत्वमपिसाधयता
लं ॥ २७ ॥ सज्जनैःकतिपयैरतिदीनैश्चालितैःकलिबलाच्छुभमार्गा
त् ॥ अप्युपेक्षितविकर्षणदुःखांसातिशोकमपिकैश्चनदृष्टां ॥ २८ ॥
वासुदेवधरणीधरनाथेत्युच्चकैरपिमुहुःप्रवदंतीं ॥ पूर्णषड्गुणमजंगत
दोषंबिभ्रतींहृदिविविक्तमशेषात् ॥ २९ ॥ वार्यतांबुधजनैर्ननुहाहानै
षधर्मइतिचाभिदधानां॥कृष्णपालिततमामनवद्यामप्यनन्यशरणांश
रणोक्तां ॥ ३० ॥ वेदिजामिवपुराभरताग्र्यःसस्वयंश्रुतितातिंखलुदृ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्ट्वा ॥ पुष्टबुद्धिरकरोत्करुणाब्धिर्दुष्टपक्षदमनस्थिरसंधां ॥ ३१ ॥
अव्ययंसततमप्युपभुक्त्यावित्तमग्र्यमिवदूरयियासुः ॥ज्यायसेसगु
रवेहरिगीताभाष्यमेषविरचय्यतदादात् ॥ ३२ ॥ हेतुवादिनिविशं
कटबुद्धौतीर्थमर्थयतिगंतुमनुज्ञां ॥ तांदिदेशपुरुषोत्तमतीर्थेचिंतयन्स
पुरुषोत्तमरक्षां ॥ ३३ ॥ नीरजामलयमंडलवृत्त्याश्लाघितोभुविसदा
ल्यनुयातः ॥ साधुपांथपरितापमपास्यन्नुत्तरांदिशमयान्मरुदंशः ॥
॥३४ ॥ बुद्धिशुद्धिकरगोनिकराढ्यंतीर्थजातमुभयंचधरिण्यां ॥ आ
त्ममज्जनतएवनिकामंपर्यशोधयदमंदमनीषः ॥ ३५ ॥ वासुदेवप
दसंततसंगीतेजसाप्यलमधःकृतशर्वः ॥ अत्यवर्ततनितांतमथासौ
गांगमोघमघनाशनकीर्तिः ॥ ३६ ॥ तत्रतत्रसजगत्त्रयचित्रंकर्मशर्म
दमनुस्मृतिमात्रात् ॥ संचरन्विदधदापनराणांगोचरंबदरिकाश्रम

CC-0. Gurukul Kangri Collection, Haridwar

पार्श्वे ॥ ३७ ॥ मंडयन्भरतखंडमखंडंनादिरायणपदोत्रपरोयः ॥
तंनमन्प्रचुरधीर्हरिगीताभाष्यमर्पयदुपायनमस्मै ॥ ३८ ॥ प्रीतये
स्यपुरतोवरभाष्यंवाचयन्सजनतामपसार्य ॥ ३९ ॥ एतदर्थमपिसू
क्ष्ममपिलशक्तएवनयदात्थसमस्तं ॥ तेनलेशतइतीहपदंस्यादित्यग
द्यतजगज्जनकेन ॥ ४० ॥ तेनतत्प्रवचनेविहितेलंशुश्रुवुःप्रशयिता
अपिशिष्याः ॥ उच्यतामितिमुहुःसपृथिव्यास्फालनंपदमहोहरि
णोक्तं ॥ ४१ ॥ शब्दभेदमवधार्यतमर्चासन्निषण्णवपुषःपरमस्य ॥ त
स्यभावविदद्भ्रमनीषःप्रोत्थितःप्रवचनंव्यधितेभ्यः ॥ ४२ ॥ मज्जनं
व्यधितशीतलगंगावारिनित्यमरुणोदयकाले ॥ यत्स्पृशंतिननराहि
मभीताअंशएषपृषतामधिपस्य ॥ ४३ ॥ काष्ठमौनमदधादुपवासं
शुद्धमप्यकृतशुद्धहृदिच्छन् ॥ नित्यतुष्टहरितोषविशेषाचिंतयन्प्रभुम

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नंतमठांतः ॥ ४४ ॥ प्रेरयत्स्वचरणेरतचित्तंमध्वमत्रादिनमंडलमेनं ॥
स्वाश्रमोपगमनायमुकुंदोदीप्तिदृष्टिविदितागतिरन्यैः ॥ ४५ ॥ नक्त
मेवभगवत्युपयातेप्रोदितेसतिसहस्रमरीचौ ॥ मौनवानलिखदुत्तम
चित्तःशिष्यशिक्षणपरःकरुणावान्॥४६॥ नेदृशंस्थलमलंशमलघ्नंना
स्यतीर्थसलिलस्यसमंवाः ॥नास्तिविष्णुसदृशंननुदैवंनास्मदुक्तिसदृ
शंहितरूपं ॥४७॥यातितावदधुनैवजनोयंव्यासरूपमजितंप्रदिदृक्षुः
॥ आव्रजेदिहनवासहिवेदस्वस्तिवोस्त्वितिययावथमध्वः ॥४८॥ ना
थनाथबतनोत्रविनाथान्मात्यजोरुकरुणोभगवंस्त्वं ॥ नोदितंस्मृत
मपीतिहिशिष्यैःस्वामिनोभिमतभंगभयेन ॥ ४९ ॥ सद्गुरोर्नविरहं
सहमानःसत्यतीर्थयतिरन्वगमत्तं ॥ यस्त्रिवारामितरासुतशाखास्वर्थम
ग्र्यमशृणोत्पुरुसंख्यात् ॥ ५० ॥ दुर्गमार्गगतमप्यनुधावन्नापसोयम

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुणीभवतीने ॥ लीलयासजवमाक्रममाणंयाश्रयांतरसुदूरशिलासु
॥ ५१ ॥ आनिवृत्तवपुषागुरुणारात्पाणिनाह्यभिनयेनसुनुन्नः ॥ त्र
स्तधीरतिययौसमुहूर्तात्तद्विनोपगतमार्गमशेषं ॥ ५२ ॥ आश्रमेनि
जजनानिहदृष्ट्वातंप्रसादमहिमानममुष्य ॥ प्रोच्यतत्स्तवनमप्यति
चित्रंतस्यतैःसहसदास्मरदेषः ॥ ५३ ॥ वानरेंद्रइववायुजवोसौभीम
सेनइववदानवभीमः ॥ उल्ललासगिरिपुंगवशृंगेसव्रजन्वृजिननाशन
नाम ॥ ५४ ॥ बहुसत्वगणंसविकंसमहाविषमोक्षमहाहिमवंतमयं
॥ विषमोक्षमहाहिमवंतमयन्नगमैक्षतफुल्लदृगस्तभयः ॥ ५५ ॥ सुह
सितकमलाकरोपगूढंसुजनसुखार्थमनंतभोगशय्यं ॥ विकासितसुम
नोघटागमुच्चंमरकतरत्नमयस्थलाग्र्यशोभं ॥ ५६ ॥ पादोपांतनम
न्महामुनिगणंहेमप्रदीप्तांबरंश्रीमद्रत्नकलापमग्र्यकटकैर्विभ्राजितं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हाटकैः ॥ दृष्ट्वातंधरणीधरंसुवनमालोल्लासिनंसुंदरंस्वानंदाकृतिम
स्मरन्मुररिपुंस्वानंदतीर्थस्तदा ॥ ५७ ॥ इतिश्रीमत्कविकुलतिल
कत्रिविक्रमपंडिताचार्यसुतनारायणपंडिताचार्यविरचिते श्रीमध्ववि
जयेमहाकाव्येआनंदांकेषष्ठःसर्गः ॥ ६ ॥ ॥ ॥
श्रीनृसिंहायनमः ॥ श्री ॥ अथहैमवतेतटांतरेबदरीषंढविशेषमंडित
म् ॥ परमाश्रममाश्रयंश्रियःसकलज्ञःसददर्शविश्रुतं ॥ १ ॥ हि
मवर्षरविप्रभासहाःपृथुसत्रप्रथिताद्विजाश्रयाः ॥ अपिविष्णुपदस्पृ
शोलसन्नुभयेयत्रविचित्रशाखिनः ॥ २ ॥ श्रवणामृतगीर्गणैर्द्विजैः
शुकमुख्यैःशुभपक्षिभिर्युतं ॥ कमलेष्टतमस्थिरांतरैरपिहंसैःपरमै
रमैचकैः ॥ ३ ॥ सुमनोनिकरेणपूरितंस्वमनोभीष्टदमल्पदुर्गमम्
॥ अपरस्परमत्सरप्रजंननुवैकुंठमिवाच्युतालयं ॥ ४ ॥ तमिमंप्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशंतमाश्रमंद्व्यधिकात्रिंशदुदारलक्षणम् ॥ गुणसारविदःकुतूहलाद
वलोकयर्षयइत्यचिंतयन् ॥ ५ ॥ कनकातुलतालसंनिभःकमलाक्षो
विमलेंदुसन्मुखः ॥ गजराजगतिर्महाभुजःप्रतियान्कोयमपूर्वपूरु
षः ॥ ६ ॥ अतिशांतवपुर्निशाकरःस्वयमेकांतखरोदिवाकरः ॥
इतिनास्यगुणार्णवाकृतेरुपमानंभुवनेषुलभ्यते ॥ ७ ॥ परमाश्र
मिणांगतश्रमोननुचिन्हानिविभर्तिधीरधीः ॥ अपिमानुषभाववि
ग्रहोविपुलंविस्मयमातनोतिनः ॥ ८ ॥ चतुरश्चतुराननःस्वयंप
वनोवाव्रतिरूपआव्रजन् ॥ श्रुतिनाथदिदृक्षयान्यथानखलुस्यान्नि
खिलाग्र्यलक्ष्मवान् ॥ ९ ॥ अवलोकितलक्षणःसतैरितिसंचिंत्यकुतूह
लाकुलैः ॥ अविलंबगतिर्न्यशामयत्तरुमारात्सुरपादपोत्तमं ॥ १० ॥
मसृणत्वचमुन्नतंततंबहुशाखाफणसूनरत्नकं ॥ भगवंतमनंतमंतिके

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थितमीशस्यनिषेवणायवा ॥ ११ ॥ अतिचित्रविचित्रपत्रिणंबहुवर्णं
हरिगोनिवारकं ॥ मुनिनंदनमिंदिरापतेरधिकेष्टंपततामिवाधिपं ॥
॥१२॥ अमृतात्ममहाफलप्रदंदुरवापंहरिभक्तिवर्जितैः ॥ श्रितसाधु
पुराणभारतंनिगमंमूर्तमिवोरुशाखिनं ॥ १३ ॥ अथतस्यसवेदिकां
तरेसुविशालेविमलेमनोहरे ॥ अवलोकितवाननंतधीर्दिविदेवानिव
तापसोत्तमान् ॥ १४ ॥ अपिसप्ततयाविराजितान्गतसंख्यान्गुणि
नोगुणोज्झितान् ॥ अपिमन्युमदादिवर्जितान्गतभोगान्पवनाशना
न्सदा ॥ १५ ॥ मुनिमंडलमध्यवर्तिनंत्रिजगन्मंडलमंडनायितं ॥ इ
हसत्यवतीसुतंहरिंपरिपूर्णप्रमतिःसमैक्षत ॥ १६ ॥ निजहस्तकमलेति
निर्मलेसततंसाधुनिशामयन्नपि ॥ अवलोक्यपुनःपुनर्नवंतमसौविं
स्मितइत्यचिंतयत् ॥ १७ ॥ अगणेयगुणार्णवोमलःसहिनारायणए

CC-0. Gurukul Kangri Collection, Haridwar

षकेवलं ॥ विधिनानुसृतंपराशरात्सुपुवेसत्यवतीकिलात्रयं ॥ १८ ॥
धवलेस्यमनःपयोनिधौसदनुक्रोशगिरींद्रलोलिते ॥ प्रकटीभवतिस्म
सुंदरीदयितादैत्यरिपोस्त्रयीमयी ॥ १९ ॥ इतएवपुराणगौरगौसम
हाभारतपारिजातके ॥ सतिजातवतिव्यजायतप्रवरंसूत्रगणामृतंस्व
यं ॥ २० ॥ निरवग्रहमुर्वनुग्रहंविदधत्पांडुसुतादिसज्जने ॥ अवना
ववनायसंविदांसुचिरायैषचचारचारुगीः ॥ २१ ॥ अधुनाकलिकाल
वृत्तयेसवितेवक्षणदानुवृत्तये ॥ जनदृग्विषयलमत्यजद्भगवानाश्रम
मावसान्निमं ॥ २२ ॥ तदिदंवपुरस्यदृश्यतेदलितेंदीवरसुंदरद्युति ॥
परमाजिनयोगपीठगंममचेतोनयनाभिनंदनं ॥ २३ ॥ अगणेयगुणैः
सुपूरितंपरिपूर्णागणितात्मसद्गुणैः ॥ इदमस्तसमस्तदूषणंसाचिदा
नंदमयंहिकेवलं ॥ २४ ॥ कमलाकमलासनानिलैर्विहगाहींद्रशिवेंद्र

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वकैः ॥ पदपद्मरजोस्यधारितंशिरसाहंतवहाम्यहंमुहुः ॥ २५ ॥
प्रणमामिपदद्वयंविभोर्ध्वजवज्रांकुशपद्मचिन्हवत् ॥ निजमानसरा
गपीडनादरुणीभूतमिवारुणंस्वयं ॥ २६ ॥ ननुकेवलमेववैष्णवंश्रि
तवंतःपदमात्मरोचिषा ॥ तमसोप्युभयस्यनाशकाविजयंतेनखरान
वंरविं ॥ २७॥ सुकुमारतलांगुलीमतोःपदयोरस्यनिगूढगुल्फयोः ॥
उपमानमहोनदृश्यतेकविवर्यैरितरेतरंविना ॥ २८ ॥ उचितांगुरुतां
दधत्क्रमाच्छुचितेजस्विसुवृत्तमुत्तमं ॥ भजतोत्रचभाजयत्यदोविभुजं
घायुगलंसरूपतां ॥ २९ ॥ अचलासनयोगपट्टिकावरकक्ष्यासकृदा
त्तमिष्टदं ॥ परितोपिहरिंस्फुरंत्यहोअनिशंधन्यतमेतिमेमतिः ॥३०॥
रुचिरेणवरेणचर्मणारुचिराजद्युतिचारुरोचिषा ॥ परमोरुनितंबसं
गिनापरमाश्चर्यतयाविराजते॥ ३१॥ तनुनिम्नसुनाभिशोभितवलिभे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वारिजनाभआदधे ॥ प्रतनावतिसुंदरेमृदावुदरेस्मिन्जगदंडमंडलं
॥ ३२ ॥ हृदयेकृतसज्जनोदयेसुविशालेमुनिवंशशेखरः॥उभयंवहतित्र
यीमयंविमलंब्रह्मसुसूत्रमुत्तमं ३३ असमेनाधिकेसुसाधितेनिजतातेर
विराशिदीधिति ॥ प्रददौत्रिजगज्जयध्वजंविधिरेतद्गलसंगिभूषणं ॥
॥ ३४ ॥ अरिवारिजलक्षणोल्लसत्सुकुमारारुणपाणिपद्मयोः ॥ पृथु
पीवरवृत्तहस्तयोरुपमानैवलभामहेनयोः ॥ ३५ ॥ भजतांवरतर्कमु
द्रयाद्यातिहस्ताग्रमबोधमीशितुः ॥ अधिजानुसमर्पितंपरकृतंभूयोभ
यभंगमंगलं ॥ ३६ ॥ सततंगलतास्वतःश्रुतित्रितयेनैवनिकाममंकि
तः ॥ सुविडंबितकंबुरीक्ष्यतेवररेखात्रयवान्गुरोर्गलः ॥ ३७॥ सक
लास्तकलंककालिमस्फुरदिंदुप्रकरोरुविभ्रमं ॥ अधरीकुरुतेस्वशो
भयावदनंदेवशिखामणेरिदं ॥ ३८ ॥ अरुणाश्मदलांतरोल्लसन्नव

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुक्तावलिमस्यलज्जयेत् ॥ हसतःसितदंतसंततिःपरमश्रीररुणोष्ठरो
चिषः ॥ ३९ ॥ द्विजवृंदकृतंकुतूहलादनुयोगांधुसहस्रमुत्तमं ॥ इयमे
कपदेसरस्वतीश्रुतिभर्तुःपरिपूरयत्यहो ॥ ४० ॥ जलजायतलोचन
स्यमामवलोकोयमुपेत्यलालयन् ॥ कुरुतेपरिरभ्यपूरितंभुवनानंदक
रस्मितान्वितः ॥ ४१ ॥ उपकर्णममुष्यभासितातुलसीमंत्रयतीवला
लिता ॥ ममनाथपदंनमत्सराज्जलजाद्यानिहरेयुरित्यलं ॥ ४२ ॥ वि
भवाभिभवोद्भवादिकंभुवनानांभुवनप्रभोर्भ्रुवोः ॥ अनयोरपिदभ्र
विभ्रमात्सभवांभोजभवात्मनांभवेत् ॥ ४३ ॥ त्रिजगत्तिलकालि
कांतरेतिलकोयंपरभागमाप्तवान् ॥ हरिनीलगिरींद्रमस्तकस्फुटशो
णोपलपंक्तिसंनिभः ॥ ४४ ॥ नवमंबुधरंविडंबयद्वरविद्युद्वलयंजग
द्गुरोः ॥ अवलोक्यकृतार्थतामगांसजटामंडलमंडनंवपुः ॥ ४५ ॥ न

CC-0. Gurukul Kangri Collection, Haridwar

रमापिपदांगुलीलसन्नखधूराजदनंतसद्गुणान् ॥ गणयेद्गणयंत्यनार
तंपरमान्कोस्यपरोगुणान्वदेत् ॥ ४६ ॥ नकुतूहलिताकुतूहलंतनुमे
नामवलोक्यसद्गुरोः ॥ सनवावरणांडदर्शिनोगृहबुध्यामममानिष्कुतूह
लं ॥ ४७ ॥ इतिचिंतयतामहाधियापदवींबाह्यगतामतीयुषा ॥ सम
नोनयनैःपुरागतस्ततआपेवपुषापिवेदराट् ॥ ४८ ॥ गुरुभक्तिभरान
ताकृतिर्विरचय्यांजालिबंधमंजसा ॥ क्षणमामुकुलीकृतेक्षणःसगुरुंकेव
लमभ्यवदंत ॥ ४९ ॥ विनयाभरणेनभूषितःस्फुटमष्टांगविशिष्टचेष्टि
तः ॥ भगवत्तमपादपंकजेभगवान्सप्रणनामभाग्यवान् ॥ ५० ॥ सनि
रीक्ष्यपराशरात्मजःप्रणतंप्रेष्टमशेषसद्गुणैः ॥ करयोर्युगलेनवल्गुनात
मुदस्थापयदाशुपातिना ॥ ५१ ॥ अमितप्रमतिंश्रुतीश्वरःपरिरभ्यपरि
गृह्यतद्भुतं ॥ प्रणयामृतपूर्णमानसःस्मितवक्त्रःपरिफुल्ललोचनः ॥ ५२ ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यमजाम्युदवाहऊर्जितोयदिजांबूनदवारिसंव्रजेत्॥कनकद्युतिमध्वसं
गवानुपमीयेतसतेननीलभाः ॥ ५३ ॥ यदिराजविभूषणैर्युतौद्विजव
र्यान्वयजाविमौहरी ॥ नृपगोत्रभुवोःपुरात्मनोःस्फुटतुल्यावुपगूढयो
र्मिथः ॥ ५४ ॥ इदमापशुकोपिलालनंनक्षमग्रंजगतांपितुःपितुः ॥
अलभीष्टयदेषधन्यइत्यतिकौतूहलमापितापसैः ॥ ५५ ॥ अमुष्य
शिष्याविनयेनतस्मैगुरोरभिप्रायविदोविदग्धाः ॥ तदानुरूपंददुरा
सनंतेचतुर्मुखायेवमुकुंददासाः ॥ ५६ ॥ आस्यतामित्युदीर्योपाविष्टे
सत्यवत्याःसुतेसत्यवाचि ॥ मानयन्मंदहासावलोकैस्तान्मुनींद्रानि
होपाविशत्सः ५७ ॥ अवगम्यतंमुनिगणावरिष्ठतोविधिवद्व्यधुर्वि
धिविदोस्यमाननं ॥ अपिसंकथाःश्रुतिसुखाःकवींद्रयोरनयोर्निशं
म्यपरमांमुदंययुः ॥ ५८ ॥ सज्ज्ञानायानंदविज्ञानमूर्तीप्राप्तौप्टे

CC-0. Gurukul Kangri Collection, Haridwar

थ्वीमाश्रमेतत्रतावत् ॥ जाज्वल्येतेविष्णुवायूस्मदेवौवेदव्यासानं
दतीर्थाभिधानौ ॥ ५९ ॥ इतिश्रीमत्कविकुलतिलकत्रिविक्रमपं
डिताचार्यसुतनारायणपंडिताचार्यविरचितेश्रीमत्सुमध्वविजयेमहा
काव्येआनंदांकेसप्तमः सर्गः ॥ ७ ॥ ॥ छ ॥ ॥ छ ॥
॥ श्रीनृसिंहायनमः ॥ श्री ॥ प्रतिभाप्रभाप्रमुखसद्गुणैर्निजैरातिवि
स्मयंनियमिनांमनोनयन् ॥ पुरुधीःकदाचिदथवेदनायकंविजनेशनै
रुपससादतंवने ॥ १ ॥ सुविशेषवदशेषवर्णितप्रतिबोद्धुरस्यननुशि
ष्यतोचिता ॥ गुरुमानसस्यगुरुतापिसत्पतेरितिसोपसात्तिरमरैरमा
न्यत ॥ २ ॥ पुरएवपूरितमपूरयत्पुनर्ननुकृष्णएषपरमार्थसंख्यया
भगवन्मनःपुरमिवायतंपुरानिजधामतांचजगृहेतदद्भुतं ॥ ३ ॥ इति
हाससुंदरपुराणसूत्रसत्प्रियपंचरात्रनिजभावसंयुतं ॥अशृणोदनंतत्द्व

द नंततोचिरात्परमार्थमप्यगणितागमावलेः ॥ ४ ॥ ऋजुपुंगवस्यपरि
जानतःस्वयंसकलंतदप्यलमनंतजन्मसु ॥ स्वकृतोर्वनुग्रहबलादमुष्य
तांविशिशेषशेषशयनःपुनर्धियं ॥५॥ अथबादरायणसहायसंपदाप्रय
यौप्रणेतुममितांतरोयुतः ॥ अपिनादिरायणपदोदितंहरेर्वपुरंतरंल
सितमाश्रमांतरे ॥ ६ ॥ तमपश्यदाश्रमवरेप्रभूतधीर्ज्वलनंज्वलतमि
वधूमवर्जितं ॥ वरवल्कलाकलितमौंजिमेखलंविलसज्जटावलयमा
दिपूरुषं ॥ ७ ॥ अतिदुर्जयेंद्रियजयादिरूपिणातपसावसंतमिवसंत
तंवने ॥ निजरूपभूतनिरपेक्षनिर्मलप्रचुरात्मसौख्यरतमप्यनारतं ॥
८ ॥ नयनद्वयेननलिनप्रभामुषापरिफुल्लताविलसितेनविस्मयात् ॥
तमवेक्ष्यधर्मजमधर्मदुर्लभंमनसेतिभूरितरमानसोस्मरत् ॥ ९ ॥ जग
तांचतुर्दशतयंचतुर्मुखप्रमुखैर्युतंप्रलयमानिनाययः ॥ सममुल्लसन्कम

लयैवकेवलपरमःसएषहिपुराणपूरुषः ॥ १०॥ त्रिगुणाकृतिप्रकृतितो
महत्ततस्त्रिविधामहंकृतिममर्त्यखान्यतः ॥ अपिभूतपंचकमितोंडमंड
लंभगवानसाविहजगंतिचासृजत् ॥ ११ ॥ विधिवायुवींद्रशिवकौशि
केशकानमरामरानुगनरासुरादिकान् ॥ सृजतिप्रपालयतिहंतिसंततं
स्वगतिंप्रयापयतिचैषलीलया॥१२॥अगणेयसद्गुणगणोविदूषणःस्व
वशाखिलोप्यनुपचारतःस्वयं ॥ स्मृतिकीर्तनप्रणतिभिर्विमुक्तयेस्वज
नस्ययात्ययमनेकरूपतां ॥ १३ ॥ चतुराननायचतुरःपुरागमान्प्रद
दावसावनिमिषेश्वरःप्रभुः ॥ विनिहत्यहिश्रुतिमुषंपुरातनंवपुषोत्धतं
हयमुखेनसाद्रिपुं ॥१४॥ अमरेंद्रवैरिभुजदंडमंडलप्रतिकर्षपुष्करपत
त्धरोत्धृतिः॥विदधेवराहवपुषामुनोर्मिमत्सृतिसिंधुकच्छपतयात्तराक्षि
णा ॥ १५ ॥ नरसिंहएषविददारदारुणंप्रतिघोदयेनखरचक्रतेजसा

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ स्वरिपुंक्षणेनसरसः स्फुरत्तनुंपृथुसत्वमिष्टजनभीतिभंजनः ॥ १६
अपिवामनोललितबाल्यवानयंप्रतिभाबलेनकृतदैत्यकौतुकः ॥ उप
धरेधःकृतबलींद्रशात्रवःस्वजनायकेवलमदात्परंपदं ॥१७॥ कथयंत्य
मुंपरशुभासमानगोहतमर्त्यदेवतमसंमुहुर्मुहुः ॥ जगतांहितंहरिमि
वापरंहरिंगुरुशक्तितापसवरान्वयोद्भवं ॥ १८ ॥ करुणाकरःसवसुदे
वमोददोभगवान्पुराहिमकरान्वयेभवत् ॥ जितवान्दिशोदशरथो
ग्ग्यसंपदोजनकोबभूवभुवियस्यवैरिहा ॥ १९ ॥ भुजगेश्वरोपिभुवने
श्वरप्रियःसमजन्यथारिदरजन्मभुठ्यभूत् ॥ तममुष्यकांतिविजितेंदु
मग्रजंरमणीयमाहुरिहरामनामकं ॥ २० ॥ जनकेनसोथविरहास
हिष्णुनामुहुरीक्षितोवनमनीयतप्रभुः ॥ चकितेनदुष्टजनतस्तपस्वि
नाततअसुरींनिशिचरींजघानसः ॥ २१ ॥ मुनिसप्ततंतुकृतवैरबंधनं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कटुकेऽप्यरिष्टपदमुख्यदुर्जनं ॥ क्षपयंतमुद्यतसुबाहुमाहवेतमथाभ्य
नंददमराद्दिसद्गणः ॥ २२ ॥ सवनेविकस्वरगुणस्वरद्विजेस्फुरितेच
रन्नूसकलगोकुलप्रियः ॥ इतकामतापसरसार्द्रधीगिरःप्रतिलालयन्न
रमतैषसुंदरीः ॥ २३ ॥ सहजान्वितःसकलमित्रसंयुतोमधुरांपुरींज
नकवल्लभांगतः ॥ प्रविशन्निमांसजगदेकसुंदरोनरनार्युदारनयनोत्स
वोभवत् ॥ २४ ॥ अथखंडितेश्वरधनुःसलीलयाक्षपितोग्रसेननृपपु
त्रपौरुषः ॥ समुपास्यविप्रगुरुमब्जभूगुरुःस्वजनानमोदयदमेयतेज
सा ॥ २५ ॥ कमलामयंकमलपत्रलोचनांभुवभागतांनृपसुतांगृहीत
वान् ॥ निजलीलयाविजितराजशात्रवोमुदमापदाप्यपुरमब्धिदुर्ग
मं ॥ २६ ॥ सजगाममातृजनतुष्टयेकिलत्वरितोवनंविदधदीप्सितं
सतां ॥ सहभार्ययापिशुभयामहाजयध्वजलक्ष्मणाग्र्यसुहृदाविना

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुदा ॥ २७ ॥ समतीतपर्वतपुरोगदुर्गमःखरदूषणादिसुजनद्विषोब
हून् ॥ सनिहत्यविश्वभयदंसुदुःसहंनरकंमहातमउपानयत्क्रमात् ॥
॥ २८ ॥ रुचिराश्रमाजिररचिताग्र्यतेजसाप्रियया प्रियोभुवनमान्य
यासमं ॥ भृशमाकुलीकृतमदप्रमादवत्सुरपारिजातल्हदवापधामसः
॥२९॥ हरितामधीशनरदेवमंडलंदशकंविजित्यपरभीषणंमुहुः ॥ स्फु
रितामिहप्रियतमांनिजश्रियंभगवानुपैक्षतहरंतमप्रियं ॥ ३० ॥ अ
भिवंदितःपवननंदनादिभिःसकदाचिदिंद्रसुतवर्धकोगवा ॥ निजरा
ज्यमात्मदयितायदत्तवान्हरिसूनवेहतविपक्षमुत्तमं ॥ ३१ ॥ मुदमा
प्यतत्रदयितोरुवार्तयामधुहामरुत्सुतमुखप्रवृत्तया ॥ हरितिग्मचक्र
लसितोब्धिमध्यगंप्रययौसपुण्यजनसेवितंपुरं ॥३२॥ पृथुकुंभकर्णग
जराजमुत्थतंससहोदरंसविबुधेंद्रशात्रवं ॥ धरणीभरंपृथुलचक्रमाक्षि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णोन्निशितेषुचक्रकृतविक्रमःप्रभुः ॥ ३३ ॥ अथभार्ययाहुतवहं
प्रविष्टयासहितःसहोदरपुरःसरैरपि ॥ अयमाप्यधामचिरमिष्टदः
सतांनिजमूलरूपपरमैक्यमेयिवान् ॥ ३४ ॥ महिदासपूज्यचर
णोद्विजादभूद्विदितात्सविष्णुयशसोमलात्मनः ॥ इहयोदधेजग
तिपापशांतयेबहुधामहेतिमतिदीप्तगोस्थितिं ॥ ३५ ॥ सुतपो
रुचेरयमपापकृर्दमान्ननुमानवीतनयतामुपेयिवान् ॥ समयेनभू
रिनिजभक्तिपूरितान्समजीजनत्सुमनसःसदेवराट् ॥ ३६ ॥ सु
बृहत्पयोधरमिथःप्रसंहतिप्रकटीभवत्परमयौवनाकृतिः ॥ असुराहि
तांवराविलासिनीतनुःप्रददावमुष्यसुरराशयेसुधां ॥ ३७ ॥ सुजना
यदत्तपदआत्मशुद्धिदःसुकुमाररूप्यभवदेषशाश्वतः ॥ अनसूययाशु
चिमनीषयाधृतःपरमादरजमुनिपुंगवोढया ॥ ३८ ॥ दयितःसतामृष

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भएषभूधरोवपुरुद्वहन्परमहंसलक्षणं ॥ व्यहरद्बलक्षतमपक्षशोभनं
परतत्वलिप्सुसनकादिवंदितः ॥ ३९ ॥ उदपादिधर्मतनयाह्वयंहरि
र्नरदेवसोदरउदारविक्रमः ॥ अपिकृष्णइत्यभिहितोमुदेसतांस्वयमे
वयस्यसहजोऽव्यजायत ॥ ४० ॥ परमात्मनेसततमेकरूपिणेदशरू
पिणेशतसहस्त्ररूपिणे ॥ अविकारिणेस्फुटमनंतरूपिणेसुखचित्सम
स्ततनवेनमोनमः ॥ ४१ ॥ इतिचिंतयन्नविरलांतरोहरिंप्रणनाम
सप्रणयमादृतोमुना ॥ अजितौपरस्परसभाजितौसतौनिकषानिषाद
तिपुरोपवेशिनौ ॥ ४२ ॥ विविधाविधायकिलतत्रसंकथावदनंमु
नींद्रतनयस्यसुंदरं ॥ अवलोक्यलोकपतिराननंमहासुखतीर्थमाहर
हसिस्मगामिमां ॥ ४३ ॥ शृणुदेवकार्यमवधार्यधैर्यवान्मदुदीर्यमा
णमिदमार्यसंमतं ॥ भवितान्यदुष्करतरंविधाययत्तरुणंतवावतरणं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाफलं ॥ ४४ ॥ अपिधायसूत्रहृदयंसतांप्रियंप्रविधायभाष्यम
धुनानिजेच्छया ॥ अपरैःश्रुतिस्मृतिनिजार्थदक्षकैःसुतरांतिरोभवति
संविदाहता ॥ ४५ ॥ अपनेतुमेनमनयंकृतंखलैःप्रतिनेतुमात्मजनतां
शुभांगतिं ॥ कुरुसूत्रभाष्यमविलंबितंव्रजेःसुमतेनयोजयकवेःश्रुति
स्मृतीः ॥ ४६ ॥ अमितांमितामपिगिरंजगद्गुरोरितितांनिशम्यविर
लेतरांतरः॥ वदतांवरस्तमवदत्तदातयोर्विरहाक्षमःखलुचराचरेशयोः
॥ ४७ ॥ भवतोरितःसततसेवनामृतेममसंकुमस्तुभगवन्ननुग्रहः ॥
नलभेयवल्लभतमेदृशंसुखंजगतांत्रयेपिजगदेकमंगलं ॥ ४८ ॥ क
लिकालकालितगुणेधरातलेसुजनोननुनमधुनास्तियोग्यधीः ॥ पर
तत्ववर्णनमयोग्यतावतेननुहव्यदानमिवनिंद्यतेशुने ॥ ४९ ॥ इति
तंब्रुवाणमयमब्रवीद्विभुर्भुविसंतिसौम्यपुरुषागुणांचिताः ॥ विमला

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्मणीनिवगुणोञ्झितानिमान्दययाविशोधयविशुध्दगोगणैः ॥५०॥
॥ तवकीर्तिरार्तिमतिमात्रमानयेदशुभान्प्रभाकरविभेवकौशिकान् ॥
कमलाकरानिवशुभान्प्रबोधयेत्परमाज्ञयाममविशेषतोनिशं ॥ ५१ ॥
इतिसामहीधरमुखाद्विनिःसृताजगतांसुखायविशदासरस्वती ॥ द्वि
जराजगोविषयतातिपूरितंप्रविवेशमध्वपृथुबुध्दिवारिधिं ॥ ५२ ॥
मतमित्यवेत्यमहितंमहतोरभिधायबाढमितिधीरमतिः ॥ अनयोर्नि
योगमधिरोपितवान्स्वशिरस्यनन्यसुवहंप्रणमन् ॥ ५३ ॥ आम्ना
यास्त्रयइवतत्त्वबोधकास्तेपापघ्नास्त्रयइवपावकाःप्रजानां ॥ लोकावा
सकलभृतस्त्रयोत्ररेजुःसानंदामुनिसुतधर्मसूनुमध्वाः ॥ ५४ ॥ इति
श्रीमत्कविकुलतिलकत्रिविक्रमपंडिताचार्यसुतनारयणाचार्यविरचिते
श्रीमत्सुमध्वविजयेआनंदांकेअष्टमःसर्गः ॥ ८ ॥ ॥ छ ॥

CC-0. Gurukul Kangri Collection, Haridwar

॥ श्रीनृसिंहायनमः ॥ चोदयंतमथगंतुमादरात्तत्रधर्मजमजंप्रण
म्यसः॥ सौख्यतीर्थकविलोकनायकोवेदनायकपुरःसरोययौ ॥ १ ॥
आश्रमांतरमवाप्यकृष्णतःश्राव्यमेषसकलंचशुश्रुवान् ॥ चित्तवृत्ति
मनुवृत्तिमान्गुरोःसाधववेत्यगमनोन्मुखोभवत् ॥ २ ॥ मंदहासमृदु
सुंदराननंवंदनीयमभिवंद्यसत्पतिं ॥ प्राज्ञमौलिमणिरभ्यनुज्ञयात
स्यतावदगमन्महामतिः ॥ ३ ॥ तस्यवल्लभतमासवासभूर्मानसा
त्पृथुलमानसस्यनो ॥ नात्यजत्क्षणमपिह्यसाविदंनैषनाथविरही
ततोभवत् ॥ ४ ॥ वीरदृष्टिकृतसिंहविभ्रमःशांतदृष्टिकृतशांतसं
मद्दः ॥ तत्रतत्रपथिपथ्यविभ्रमःपर्वतादवततारसर्वधीः ॥ ५ ॥
वानरेंद्रइवतीर्णवारिधिर्वासुदेवइवरत्नराजवान् ॥ भीमसेनइवसून
वर्यत्हन्निर्वृतिंस्वजनमानिनायसः ॥ ६ ॥ अंघ्रिशर्ममुखपंचपे

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विजैरन्नमात्द्दतमलंपृथक्समं ॥ कृत्स्नमाददयमित्यविस्मयःकृत्स्न
मत्तुमलमेषहिक्षये ॥ ७ ॥ व्यासदेवत्द्ददयातिवल्लभंवासुदेवमग
णयसद्गुणं ॥ साधयत्सकलदोषवर्जितंज्ञानभक्तिदमनंतसौख्यदं ॥
॥ ८ ॥ उक्तमुक्तमभिधेयमुत्तमंवेदवाक्यमनुवादयन्मुहुः ॥ व्यंज
यत्स्मृतिवचोभिरंजसातस्यचार्थमतियुक्तयुक्तिमत् ॥ ९ ॥ बालसंघ
मपिबोधयद्दृशंदुर्निरूपवचनंचपंडितैः ॥ अप्रमेयत्द्ददयंप्रसादवत्सौ
म्यकांतिचविपक्षभीषणं ॥१०॥ अस्तदूषणमवंध्यभाषणंलक्षितंसक
ललक्षणैःसमं॥माननीयमपिनाकिनायकैरूपमन्यादिवधन्यमात्मनः
॥११॥एकविंशतिकुभाष्यदूषकंब्रह्मसूत्रगणभाष्यमद्भुतं॥ अप्यदृष्य
मतनोदनंतधीर्भूतभाविभवदात्मभिःक्वचित् ॥ १२ ॥ गांगमंगल
तरंगभंगदप्रांतसुश्रिहरिवेश्मकृत्समः ॥ यद्गतैकतमवर्णलेखकःसत्य

CC-0. Gurukul Kangri Collection, Haridwar

तीर्थइहभाष्यमालिखत् ॥ १३ ॥ तत्रदेवमभिवंद्ययातवान्स्वामिनो
वचनगौरवाद्द्रुतं ॥ सानुगोविविधभूरतीत्यगोदावरीतटमगादलेश
धीः ॥ १४ ॥ प्राज्ञवित्तमयमाप्तुमागतैःपंडितैःद्विनवशाखिभिःश्रु
तीः ॥ प्रस्तुताअभिदधौपरीक्षकैःषट्चतत्रसमयानखंडयत् ॥ १५ ॥
तेपृथक्पृथगमुंस्वशाखयादर्शनेनचपरीक्ष्यानिर्जिताः ॥ सर्वविच्चम
सिमुख्यतःक्वेनास्तितेसदृशइत्यथाब्रुवन् ॥ १६ ॥ यस्त्रयीसकलप
क्षशिक्षकस्तत्रसंसदिवरिष्ठसंमतः ॥ शोभनोपपदभट्टनामकःपूर्ण
संख्यमनमन्मुहुर्मुदा ॥ १७ ॥ यस्तुतार्किकशिखामणिःसुधीर्वर्तमा
नसमयान्निराकरोत् ॥वेदभारतपुराणनिष्ठितोभाष्यमेतदशृणोत्सम
ध्वतः ॥ १८ ॥ नापरेषुरतिमाययौक्वचिद्भाष्यमद्भुतमिदंसशुश्रुवान् ॥
नारविंदमकरंदमाप्तवानच्छपिच्छइववांछतीतरत् ॥ १९ ॥ तत्र

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रसुसभासुभासुरोनंदितीर्थसमयोक्तयुक्तिभिः ॥ वादिनोविश्वकल
प्यतान्समाक्रम्यवाचमुचितामुदाहरत् ॥ २० ॥ चूर्णकृद्विविधशंख
चूर्णकश्चूर्णनायबहुधाप्यशक्नुवान् ॥ अत्यजाद्विफलधीःप्रदक्षिणाव
र्तवारिजमनर्घ्यमप्यहो ॥ २१ ॥ अप्रमेयमतिशास्त्रमीदृशंयस्त्यज
त्युपनतंसुदुर्लभं ॥ तस्यतुल्यमतिरेषदुर्जनोनाथवास्यसदृशोऽस्तिनी
चधीः ॥ २२ ॥ कोंपितंगुणविशेषविज्ञविक्रीयभूरिधनमापपूरुषः ॥
नत्वनर्घ्यगुणमूल्यमाप्यतेभाग्यदैवमिहयोग्यतानुगं ॥ २३ ॥ व्य
क्तमुन्नतिमितोप्ययंजनस्तस्ययन्नलभतेखिलंफलं ॥स्तोकमानसतया
ततोव्रजेत्तस्यहंतपुरुषस्यतुल्यता ॥ २४ ॥ क्रीतवान्नरपतिर्महादरंसा
दरंपुनरुदारचेष्टितः ॥ अर्चयन्सततमापसंपदोयानतावचनचित्तगो
चराः ॥ २५ ॥ शास्त्रकल्पकतरोरमुष्यकःप्राप्नुयात्सकलमप्यहोफ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लं ॥ यस्तमुत्तमगुणंविडंबयेदित्युदीर्यसजनानरंजयत् ॥ २६ ॥
नेदृशैःकविभिरेवकेवलंहंतपूज्यचरणोभ्यपूज्यत ॥ शर्वशक्रगुरुपूर्वदै
वतैरप्यलंसुसमयोद्गमोत्सवे ॥ २७ ॥ निम्नभूरिवसतीःप्रजाव्रजन्
वारिदर्तुरशनैरपूरिसः ॥ प्राज्यतापहरदर्शनांबुनातुंगदेशमिवदुर्जनं
तुनो ॥ २८ ॥ कर्मभिःसकललोककौतुकैर्मानितःपथिजनैःसमाग
तः ॥ संननामशिवनामकीर्तनंराजतासनपुरेविराजितं ॥ २९ ॥ अ
च्युतप्रमतिरच्युतप्रियंतंदशप्रमतिमागतंतदा ॥ वंदमानमवलोक्य
यांमुदंप्राप्तवांस्तदवधिर्नविद्यते ॥ ३० ॥ प्रीतिमार्ययतिरुत्तमांपुरा
प्रेषिताप्रतिमभाष्यदृग्ययौ ॥ अप्यतोतिशयिनींशुचिस्मितंतंविलो
क्यसुचिराद्दिदृक्षितं॥ ३१॥ पूर्णदृष्टिजलधेर्गृहीतवान्भाष्यसंज्ञमम्
तंसुखावहं ॥ चित्रमेषयतिराड्घनाघनोग्राहयंश्चमनुजान्मुमोचनो ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ ३२ ॥ सानुनीतिरथनीतिमानयंभाष्यसद्गुणगणानवर्णयत् ॥ शो
भनायगुरवेस्वभावतःकालतःकुमतलीनबुध्यये ॥ ३३ ॥ उक्तिभिस्त
मसकृत्सुयुक्तिभिर्बोधयन्बहुलधीःप्रसंगतः ॥ स्थेयसोभिषगिवास्य
त्द्दृढतंमूलदोषमरुचेरचिंतयत् ॥ ३४ ॥ दक्षपक्षविस्तृतेनताडयन्भी
षयन्समधिकस्वरश्रिया ॥ हंसराट्कलिमलंनिराकरोदेकदाष्टिमिव
मानसाङ्कुरः ॥ ३५ ॥ निष्कलंकमिवचंद्रमंडलंपुंडरीकमिवफुल्लतांग
तं ॥ वारिशारदमिवप्रसादवच्चित्तमच्युतमतेर्भृशंबभौ ॥ ३६ ॥ आ
ननंदसहिमध्वशास्त्रमाकर्णयन्कुसमयाग्रहीपुरा ॥ मोहपीतलवणो
दकोमुहुःप्राक्पिपासुरमृतंपिबन्निव ॥ ३७ ॥ विस्तृतांतरवियत्पदौ
यतीआस्यतांसुसमयप्रकाशनात् ॥ तौयथाविधुरवीअहोअहोरात्र
मप्युरुतमोन्नमोहकं ॥ ३८ ॥ सज्जनान्सहमहादरेणनॄन्पापिनांप्र

CC-0. Gurukul Kangri Collection, Haridwar

 कृतितोप्रियाकृति ॥ दारुणाघगणदारणंस्मसग्राहयत्यपिसुदर्शनद्व
यं ॥ ३९ ॥ नन्वनन्यशरणात्मनांसतांसिद्धिविघ्नमुखदोषभेषजं ॥
॥४१॥ ऐच्छदच्छलदयोदयादयंरूप्यपीठपुरगःकदाचन ॥ ४० ॥ गोपिका
प्रणयिनःश्रियःपतेराकृतिंदशमतिःशिलामयीं ॥ शिष्यकैस्त्रिचतुरैर्जे
लाशयेशोधयन्निहततोव्यगाहयत् ॥ ४१ ॥ स्पर्शनाद्भगवतोतिपा
वनात्सान्निधानपदतांगतांहरेः॥त्रिंशदुद्यतनरैःसुदुर्धरांलीलयानयदि
मामसौमठं॥४२॥ मंदहासमृदुसुंदराननंदनंदनमतींद्रियाकृतिं ॥सुं
दरंसइहसन्यधापयद्वंद्यमाकृतिशुचिप्रतिष्ठया ॥४३॥ मानिनोपिहि
वशीचकारयोदैवतप्रतिभयात्मनःखलः ॥यायजूकगुणमात्मनःस्मर
न्योजराघटितगोत्रउच्यते ॥ ४४ ॥ आत्मनःप्रियतमकृतोरमुंपाप ॥४१॥
पूरुषमवेक्ष्यघातुकं ॥ तंनिरस्यजनमप्यथाहितंसर्वभूधरसमर्थपूर्वकं

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ ४५ विश्वविस्मयकरःस्वतेजसावंद्यमानचरणःपुनर्जनैः ॥ चित्रादि
ग्विजयर्कीर्त्यकीर्तिमान्मोदयन्ननुदिनंनिजाःप्रजाः ॥ ४६ ॥ वासुदे
वदयितोमहिष्ठधीर्वासुदेवमथसाध्वयाजयत् ॥ धर्मसूनुमिवधार्मिकं
पुराभीमसूर्तिरयमेवभूसुरं ॥ ४७ ॥ याज्यया।समुचितानुवाक्यययास
प्रवर्ग्यविभवैरभिष्टवैः ॥ विश्ववेत्तुरनुजोत्रहोतृतांप्राप्यदैवततती रतो
षयत्॥४८॥सप्रयुज्यनिशितानिशातधीर्वैश्वदेववरशस्त्रसंततीः॥राक्ष
सासुरनिरासकृत्सुरान्वीरवर्यइवभागमापयत् ॥ ४९ ॥ वायुनात्रि
रपिपूर्वपायिनासर्वदैवतजितातरस्विना ॥ योपरोक्षवपुषाप्यपेक्षितः
कोत्रवर्णयतितंमहाक्रतुं ॥ ५० ॥ ब्रह्मवेदननिविष्टचेतसांकर्मतत्रक
रणांतरंभवेत् ॥ ज्ञापयन्नितिपरात्मवेदकःकर्मधर्ममपिसह्यचीकरत्
॥५१॥ यानियानिचरितानियानियानीरितानिचमनोहराण्यहो॥ ता

CC-0. Gurukul Kangri Collection, Haridwar

नितानिचवितानचेतसोविश्वविस्मयकराणिभांतिहि ॥५२॥सरस्वती
र्वृत्तिकरीःशरीरिणामतीत्यबर्ह्वीःसमततिगोत्रकः ॥ पुरेवकृष्णप्रिय
मापदश्रमंपृथुप्रबोधःपुनरुत्तमाश्रमं ॥ ५३ ॥ सहभोगमनन्यलभ्य
मस्मैहनुमद्रूपवतेददौपुराहि ॥ अनवेक्ष्यपरंस्वभीष्टकर्त्रेप्रतिदातुंहरि
रैधयत्तमेव॥५४॥प्रणम्यगुरुमादरादथनियोगतोयोग्यतःसतस्यजग
तांहितंविदधतोगतःसानुगः ॥ महिष्ठहृदयोमहामाहिमासिंधुरानंदतो
निजैरभिगतोनमद्व्रजतपीठवासंहरिं ॥ ५५॥ इतिश्रीमन्नारायणपंडि
ताचार्यविरचितेश्रीमन्मध्वविजयेमहाकाव्येआनंदांकेनवमःसर्गः ९
॥ श्रीनृसिंहायनमः ॥ सपदिसमस्कुरुतभृशंमाधवगुणसाधकोथम
ध्वरविः ॥ भृगुकुलतिलकस्थानंतापकरःपापपांथानां ॥ १ ॥ दशम
तिशिष्यःकश्चिच्छुभजनतायैकुतूहलनतायै ॥ विविधसुवृत्तंवाक्यंका

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यमिवोचेसनायकस्तवकं ॥ २ ॥ भुवनाद्भुतमध्वचेष्टितंनवदेमापिसु
रायुषावयं ॥ सकलंखलुकिंतुकिंचिदप्यथशुश्रूषुजनायवर्ण्यते ॥ ३ ॥
क्वचिदीश्वरदेवमेषभूपंखननंपांथजनंविधापयंतं ॥ स्वमपिप्रतिचो
दयंतमूचेक्रिययानोकुशलान्प्रबोधयेति ॥ ४ ॥ प्रकारंप्रकटीकर्तुमार
भ्यविररामनो ॥ महीयोमतिमाहात्म्याद्दैवश्येनखनन्खलः ॥ ५ ॥
नानेनानेनेनानेनेनोनूनेननननुन्नाः ॥ नानानानोनूनंनानेनानूननानुन्नः
॥ ६ ॥ यमशेषभवप्रभवस्मरतामसुखाब्धिरपैतिनचित्रमिदं ॥ मरु
तीदृशि भ्रांतिहियत्स्तवनेयमशेषभवप्रभवस्मरताः ॥ ७ ॥ संचरन्नंच
नीयःकदाचिद्विभुर्विष्णुपद्यास्तटंवैष्णवाग्रेसरः ॥ प्रापदात्तैर्निजैरेष
शिष्यैर्वृतस्त्यक्तविश्वस्ववंशात्रवातंकतः ॥ ८ ॥ इमान्स्वस्वपूर्वाश्रया
नात्मवाक्यात्सलीलंदयालुःसमूलाश्रयात्मा ॥ निषेद्धुननादृत्यचान

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यलंघ्यांतदात्याययत्तांनदींसंसृतिंवा ॥ ९ ॥ वारयतवारयतवैरिसु
त्ह्दोमूनूमारयतमारयतपारगमनात्प्राक् ॥ आपततआलपतइत्यव
ददुच्चैःसत्वरकराजपुरुषानुचितवाचा ॥ १० ॥ नजडाजलेपततसाह
सादहोनभयंहिवोबहुतयाबहोर्जनात् ॥ भवतांपतिंक्षितिपतिंदि
दृक्षवःप्रतियामकेनकलहंचिकीर्षथ ॥ ११ ॥ वचसेत्यनेनसपरान्यरु
णद्धुजगान्नरेंद्रइवमंत्रबलात् ॥ उदतारयत्परिजनंमृतिभिःसरितश्चदे
वसरितश्चसमं ॥ १२ ॥ निर्विकारचरितोपिपरीतःक्रूरकिंकरसहस्रत
येन ॥ सव्रजन्नुदलसज्जगदीशःसिंहराडिवसृगालसमूहे ॥ १३ ॥ अ
प्रकंप्यवपुषंसुरासुरैःसिंहसंहननमेनमुन्नतं ॥ प्राप्तमात्मनगरांतिकं
नृपःप्रेक्ष्यसौधशिखरेस्थितोब्रवीत् ॥ १४ ॥ रिपुनृपप्रणिधिप्रतिशं
कयापथिकपाटनकर्मणिदीक्षितैः ॥ सुमुखमेपरुषैःपुरुषैःकथंयमभटै

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रिवनासिविहिंसितः ॥ १५ ॥ अप्लवदेवनदीतरणंतेहंतकथंचाचिकी
र्षसिकिंलं ॥ तंनिगदंतमितिप्रभृतीहस्माहमहापुरुषोत्तमदासः ॥१६॥
योसौदेवोविश्वदीपःप्रदीप्तःकुर्मःसर्वंतत्परानुग्रहेण ॥ यामस्तावत्तूर्ण
माशामुदीचीमित्याद्यंतद्भाषयाचित्रवाक्यं ॥ १७॥गांभीर्यंधृतिमुरुवी
र्यमार्यभावंतेजोग्र्यंगिरमपिदेशकालयुक्तां ॥ राजास्यस्फुटमुपलभ्य
विस्मितोस्मैराज्यार्धंसपदिसमर्पयांबभूव ॥ १८ ॥ दंडार्हबुद्धिविष
योन्नृपपूरुषाणांराज्यार्हबुद्धिविषयोभवदित्थमेषः ॥ नीतिंप्रकाशयितु
मेवविपत्सुकार्यांगंतुंप्रभुःप्रसभतोवितथाव्यधात्सः ॥ १९ ॥ कदाचि
च्चोराणांनिकरमवलोक्याभिपततामवस्थाप्यस्वीयान्करगपटपिंडा
र्थमतिकृत् ॥ चरन्नेतेष्वेतानथमिथइहाघातयदहोविभुःसंमोह्यप्राग्वि
जयइवसंसप्तकगणान् ॥ २० ॥ अन्यत्रचचोरान्धन्यप्रवरोसौशूरां

CC-0. Gurukul Kangri Collection, Haridwar

श्छतसंख्यान्प्राप्तान्स्वजिघांसून् ॥ एकेनतुशिष्येणाकृष्टकुठारान्नि
स्ताडितयूथ्यानद्रावयतद्राक् ॥ २१ क्वचिच्छिलाच्छदाभ्रमादमुंससं
घमत्यजन् ॥ अवेक्ष्यदस्यवः पुनः कुतूहलात्तमानमन् ॥ २२ ॥ सत्यो
च्छेदेसेच्छायातंव्याघ्राकारंदैत्यंव्याघ्रं ॥ प्रालेयाद्रेःप्रांतेप्राज्ञःपाणेर्ली
लालेशेनास्यत् ॥ २३ ॥ प्रापसनारायणतःशुद्धशिलात्मप्रतिमाः
॥ यासुसपद्मासहितोदोष्यहितःसन्निहितः ॥ २४ ॥ पाराशर्यःपर
तत्वप्रसिध्यैतात्पर्यार्थंपरमंभारतस्य ॥ व्यक्तंवक्तुंनियुनक्तिस्मसाक्षादे
नंधन्यंभुवनेमन्यमानः ॥ २५ ॥ तीर्थेषुतीर्थेषुचसौख्यतीर्थःक्षेत्रेषुच
क्षेत्रविदांवरिष्ठः ॥ गोविंदमावंद्यसहानुगोगाङ्गंगांपुनस्तुंगतरंगमालां
॥ २६ ॥ क्वैरपेतामवलोक्यसिंधुंसराजबंधुंचतदाप्तसिंधुं ॥ तटेनिष
ण्णानधिकंविषण्णान्निरीक्ष्यशिष्यानतरत्सएतां ॥ २७ ॥ नवानरें

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रस्यविलंघिताब्धेर्नवानरेंद्रस्यविहर्तुरस्यां ॥ इमेस्मरंस्तद्वपुषोन्यथा
स्यशक्तस्यशंक्येतविपत्कथंतैः ॥ २८ ॥ जगत्प्रदीपायितगोगणाढ्ये
दिवाकरेमध्यदिवाकरेच ॥ अव्यक्तरूपेश्रियमत्यजन्द्राक्सहांबुजै
स्तन्नयनांबुजानि॥२९ ॥पदंपशोर्वाविनतातनूजस्तीर्त्वानदींतावददी
नसत्वः ॥ अनार्द्रवासाःसकुतूहलार्द्रैर्नृदेवभूदेवमुखैर्ववंदे ॥३०॥भीतैर
रातेरतिमात्रमत्रनतारकैरप्यथतारकैःसः ॥ स्वतेजसाविस्मितभूपनु
न्नैःप्लवेनशिष्यान्निरतारयत्तां ॥ ३१ ॥ विशंकटंस्वस्तटिनीतटंतंदीपप्र
दीप्तंजनताभिपूर्णं ॥ संचोदयत्पंडितमंडलाढ्यंनाथावलोकोत्कहृदो
ऽभ्यपश्यन् ॥ ३२ ॥ आम्नायमाम्नायविदांविदग्धंसभावभेदंप्रवदं
तमत्र ॥ दैव्यांसभायामिवपद्मयोनिंप्रेक्षंतसाक्षात्सुखतीर्थमेते ॥३३॥
प्राप्तस्ततोहस्तिनराजधानींमासानुवासेहसवासयोग्यान् ॥ मठांतरे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नंतगुणांतरःसन्नेकांतदेशेसरितोसमीपे ॥ ३४ ॥ भिवाभुवंदेवनदीं
जगामशाखाविशेषेणनिषेवितुंतं॥वाणीचयत्रेष्यतयाकृतार्थाशिवादि
वंद्यानतदत्रचित्रं ॥ ३५ ॥ गुरुप्रबर्हस्यपदारविंदंविदूरतःसाप्रणनाम
मूर्ता ॥ औदार्यसौंदर्यतनुंतनुंतामालक्ष्यशिष्यैरतिविस्मितंतैः ॥३६॥
तेनोपयातेनकदाचनाथवाराणशींपापनिवारणेन ॥ अवादिवाणीब
लिनःस्वशिष्यान्विलोक्यलीलावसरेवलिप्तान् ॥ ३७ ॥ नियुध्यसि
ध्यैयुगपद्धिवीरंमन्याभवंतोभिपतंतुमाद्राक् ॥ समस्तशक्तिंनयुनक्ति
यःस्वामत्रास्मदाज्ञांसनिराकरोति ॥ ३८ ॥ इतीरयन्पंचदशैषयूनःप्रा
प्तान्प्रयुध्यान्युगपन्निपात्य ॥ उत्थीयतांयस्यसमर्थतास्यादितिब्रुवा
णोशनकैर्जहास ॥ ३९ ॥ सौमेरवंगौरवमावहंतितवांगमंगांगुलयश्च
नोंगे ॥ पुराविनश्यामइतोदयालोस्वामिन्विमुंचेत्यवदंस्तदाते ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ ४० ॥ तेनाथमुक्तैरतिविस्मयस्तैरवाप्यनालोच्यहितत्स्वरूपं ॥ य
द्भूविजृंभेणसशर्वशक्रंजगत्समस्तंनियतंनिकामं ॥४१॥ सदाक्ष्यमाक्षि
प्तसमस्तपक्षकोयतिःप्रभुंकोप्यमरावतीपदः॥ जिगीषयाज्ञानसहाय
कर्मणःप्रसाध्यतांसाधनतत्युदाहरत् ॥ ४२ ॥ संसाधितार्थैभगवत्य
युक्तिवित्पप्रच्छसज्ञानपदार्थमुग्रधीः ॥ ज्ञातःसतेज्ञान्यसिचेन्नचेन्नसः
प्रश्नोघटेतेतिनिराकृतैषतं ॥ ४३ ॥ विततततमतमोंतंसाधयंत्यानितां
तंसदसिसदसिरेजेठ्याख्ययाठ्यासशिष्यः ॥ सकलसमयिहृस्तां
भोजबंधाभिनंदीशरदिशरदिचंद्रश्चंद्रिकासंपदेव ॥ ४४ ॥ जननंस
मयेसमयेजगतःप्रथितेसमयेसमयेदमिते ॥ सनिरासमयेसमयेस्थि
तियुक्स्वबभासमयेसमयेष्टधिया ॥ ४५ ॥ वर्तस्वाध्यधिसर्वदीठ्ये
दंसोनिशंस्वतंत्रोविष्णुः ॥ उज्ञासयदुष्टानांसंस्कुरुसाधूनूगुणाभिपू

CC-0. Gurukul Kangri Collection, Haridwar

र्णोप्यगुणः ॥ ४६ ॥ असमोत्तमोमतोसौश्रियःपतिर्विश्वतोविभिन्ना
त्मा ॥ परमान्प्रकाममर्थान्प्रकाशयामाससेत्यादीन् ॥ ४७ ॥ समा
नयायानमासमाययाततयायमा ॥ नयासनानासयानयातनालल
नातया ॥ ४८ ॥ प्राज्ञोराज्ञांत्रिदिवपदवींकौरवंक्षेत्रमाप्तःसस्मारा
थस्वविद्दतिपतद्धस्तियुद्धोत्सवानां ॥ सत्यात्माद्यैरिहपरिवृतोभा
विमारीचदृग्भिर्विस्मेरैःस्वैर्निजनृपतनूहेतिदृष्ट्यातितुष्टैः ॥ ४९ ॥
विप्रात्मेशःक्षणार्थंकृतनतिरशितिश्रीद्दर्षीकेशदेशेस्पष्टंदृष्टोप्यदृष्टः
सपदिविहितवान्विस्मयंदेहभाजां ॥ स्वप्नेस्वप्रेरितान्यस्थलगानि
जनरोपात्तैर्भक्ष्यभोज्यैःप्राज्यैःप्राभोजयत्स्वंगुरुमखिलगुरुंवेदय
न्वेदबंधुं ॥५०॥ अवाप्तवान्पुनरिषुपातमस्मरद्रमापतिंसपरशुराम
मादरात्॥ सराजकेल्युरुकदलीसहस्रकंतदादद्भ्यवद्दतिदत्तमुत्तमं

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ ५१ ॥ सशंकरपदद्विजोपत्द्दतमाप्यगोवास्यगांगरिष्ठकदलीलश
द्दशशतीचतुष्कंचरन् ॥ पयःकलशपंचकत्रिकयुगाभिपूर्णपपावदष्ट
गतिरप्यभून्नृपनृमंडलैरुद्यतैः ॥ ५२ ॥ अयमेवगोविषयतेपिकुत्र
चित्सदसिजनतार्थितोजवात् ॥ पुष्पमुतफलमहोविदधेजनसुप्रिदा
नुपमगानसंपदा ॥ ५३ ॥ धन्योमह्यतनाकिनामहितत्द्दह्वाणःसमो
जस्ययोमध्वोध्वस्तदुरागमोग्र्यहिमगुश्रीःकाममायामत्द्दत् ॥ वि
ष्णुंविश्वजयप्रदंसहिनमनूसेव्यंसुसौख्यंमुदादाक्ष्याच्छ्रीधरमामया
दिविरहीयोगीसुत्द्दत्सर्वदा ॥ ५४ ॥ इतिभुवनविभूषणस्यभू
यांस्यविगणितानिकृतांतराणिहंत ॥ श्रवणमननकीर्तनैरभीष्टंप्रतिद
दतीत्यमराःप्रकीर्तयंति ॥ ५५ ॥ इतिविविधगोधारावारैर्विशारद
वारिदोहरिपदरतोविद्याविद्युत्प्रदीपितदिङ्मुखः ॥ भवभयमहाघर्मो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्तंसदंघ्रिपमंडलंसफलसुमनःसांद्रानंदंव्यधाददविपल्लवं ॥ ५६ इति
श्रीमत्कविकुलतिलकत्रिविक्रमपंडिताचार्यसुतश्रीमन्नारायणपंडिता
चार्यविरचितेश्रीमन्मध्वविजयेमहाकाव्येआनंदांकेदशमःसर्गः १०
॥ श्रीनृसिंहायनमः ॥ प्रचुरांतरप्रवचनंफणिराडुपशुश्रुवान्ससनका
दिमुनिः ॥ गगनेल्पदृष्टवपुरत्रजनैस्त्वरितंनिलीनरुचिरापपदं ॥ १ ॥
अतिचित्रधाम्निनिजधाम्निरतंससहस्रमस्तकमनंतममुं ॥ मुनयो
भिवाद्यविनयाभरणावरमन्वयुंजततदर्थमिमं ॥ २ ॥ भगवत्तमस्य
विपुलप्रमतेःसमयंमनोहरतमंजगति ॥ महितंभवद्भिरपिलोकपतेप
ठतांमुहुःफलमुदेष्यतिकिं ॥ ३ ॥ अधिकारिणांफलमलंविदुषांभव
तिप्रवृत्तिरतिवीर्यवती ॥ इतितत्फलंसफलसंकथनोभगवान्प्रपंचय
तुभूरिदयः ॥ ४ ॥ इतितैरुदीरितमुदारमतिर्वचनंनिशम्यसजगाद

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गिरं ॥ शृणुतादरेणमहनीयतमंमहनीयपादसमयस्यफलं ॥ ५ ॥
त्रिदिवादिलभ्यमपिनास्यफलंकथितंकृषेरिवपलालकुलं ॥ स्वफलंतु
मुक्तिपदमुक्तिपदंशुकशारदादिपरमार्थविदां ॥ ६ ॥ परमागमार्थव
रशास्त्रमिदंभजताममानवकलारचितं ॥ व्रजतामहीपरमवैष्णवतां
रतयेस्वलोकमजितोदिशति ॥ ७ ॥ ननुतत्रविश्वविभवैकपदंप्रति
भातिपूर्णपुरुषस्यपुरी ॥ उपलभ्यतेयदुपमानपदंप्रतिबिंबमेवमणिव
प्रगतं ॥ ८ ॥ सितसौधसंततिरुचास्फुरितापरितोरुणाश्मगृहपंक्ति
रुचिः ॥ इहमच्छरीरवलयेलसितामनुयातिमूर्तिमसुरासुहृतः ॥ ९ ॥
शबलावलीकघटितस्फटिकद्युतिभिर्हरिन्मणिमयीवलभी ॥ प्रति
सद्मभातियमुनामिलितासितसौरसैंधवपयोभिरिव ॥ १० ॥ यदि
नाभविष्यदिहविभ्रमतानियमोजनस्यनिलयावलिषु ॥ विकटाविटं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ककुतपात्रितति:कृतकेत्यवैक्ष्यतकथंचननो ॥ ११ ॥ विविधस्तुलोप
गतचित्रपटीसुवितानलंबिमणिदामगण: ॥ शरणांतरेष्वधिकपूरण
त:प्रचकास्तिविभ्रमइवावगलन् ॥ १२ ॥ विमलाकृति:प्रकृतिरेवम
हामणिहेमसय्याखिलवस्तुमयी ॥ इहसंभवेत्सकलकांतिरस:कथि
तोधिकोक्तिभिरत:कविभि: ॥ १३ ॥ तदनादिकालमितमुक्तिरतेर
गणेयशंभुमुखसंघतते: ॥ नगरैर्महापुरमसंहतिमल्लसतिप्रभोरयम
होमहिमा ॥ १४ ॥ भवनंविभातिभुवनैकपतेर्भुवनत्रयाद्भुतगणाति
शयि ॥ वरमंदिरप्रकरमध्यगतंद्विजमंडलस्थशशिमंडलवत् ॥ १५ ॥
स्वयमिंदिरैवपतिमानकरीगृहकर्मयत्रकुरुतेसुतरां ॥ अपिकिंकरीद
शशतीमहिताश्रियमत्रवर्णयतिवेश्मनिक: ॥ १६ ॥ कमलापति:कम
लयामलयाकमनीययाकमललोचनया ॥ अमृताहिराजमृदुभोगग

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तःस्वरतोपितत्ररमतेपरमः ॥ १७॥ तरुणप्रभाकरसहस्ररुचंकनकां
बरंमणिमयाभरणं ॥ हसितानर्नेदुमरविंदहशंतमरींद्रधारिणमनुस्म
रत ॥१८॥ गणयेद्रमास्यनगुणानखिलांश्चतुराननश्चतुरवागपिनो ॥
नवयंसहस्रवदनाअपितानपरोदितानतिवदेमपुनः ॥ १९ ॥ विधयो
विहंगगतयोगणितारमणीयुताःसफणिपेंद्रमुखाः ॥ परयोगभूरिसुख
भोगमिताअवलोकयतंदधतिमोदरसं ॥ २० ॥ सचतुर्भुजावनजप
त्रहशोवरवेषिणोत्रसपिशंगपटाः ॥ अरुणप्रभाश्चतरुणाभ्ररुचोविच
रंतिनाथरुचयःपुरुषाः ॥ २१ ॥ भगवत्समीपमुपयातवतांप्रमदो
नकेवलमलब्धतुलः ॥ अपितस्यलोकमतिलोकगुणंभजतांसुदुर्लभम
भूरिशुभैः ॥ २२ ॥ नभवंतियत्रमृतिजन्मजरास्त्रिविधंभयंकिमुत
दुःखगणः ॥ अपरंचकिंचिदशुभंनभवेन्नगुणादितत्प्रभवमूलमपि ॥

CC-0. Gurukul Kangri Collection, Haridwar

॥ २३ ॥ अनुभूयतेसुखमनंतसखैःसकलैरलंमतिपदंसततं ॥ अ
पितारतम्यसहितैःस्वगुरुप्रवणैःपरस्परमुरुप्रणयैः ॥ २४ ॥ अ
तिसुंदराःसुरभयःपुरुषाहरिचंदनेननवचंद्ररुचा ॥ चलचारुचामरध
रानुचरा विचरंतिनित्यतरुणाइहते ॥ २५ ॥ सविलाससलास्यपरि
तुष्टदृशोमृदुगीतवाद्यमुदितश्रवणाः ॥ अनुरंजयंतिनवकंजदृशोरम
णाअमीस्वरमणीस्तरुणीः ॥ २६ ॥ परिणायकानुपवनाभिमुखा
ननुनिःसरंतिहरिणीनयनाः ॥ विमलाद्रिमानवलयाच्छनकैःशशिमं
डलादिवरुचोरुचिराः ॥ २७ ॥ अरुणाश्मवर्णतनवस्तनवःशुभ
हारसंनिभरुचोत्रपराः ॥ हरिनीलनीलरुचयोप्यपराःप्रकटीभवंति
विविधाभरणाः ॥ २८ ॥ सुचिरद्युतीर्दधतिसूक्ष्मतरंस्वयमंबरंच
खलुबिभ्रतियाः ॥ शुकनिःस्वनाध्रुवमिमाअपराःसुपयोधराजलधरा

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वलयः ॥ २९ ॥ समतीताविद्रुमभुवांसुदृशांपदपल्लवाग्र्यनखरक्त
रुचीः ॥ परभागतःस्फटिककुट्टिमभूःप्रकटीकरोतिनपुराप्रकटाः ॥
॥३०॥हरिणीदृशांसुवसनाबृहत्सुनितंबबिंबरुचिरोरुरुचा॥ शबलद्यु
तीनिमदनस्यजगज्जयवैजयंत्यइतिनिश्चिनुमः ॥ ३१ ॥करपल्लवैस्त
रलितैर्ललितैरसकृत्क्वणत्कनककंकणकैः॥नवरोमराजिवलिवल्गुमृदु
प्रतनूदरैरतिमनाक्करलैः ॥ ३२॥कुचकुंभपूर्णतरकांतिसुधारसशेषबिं
दुविसरच्छविभिः ॥ वरहारराजिभिरुतानूपदंप्रतिलोडिताभिरशनै
रुरसि ॥ ३३ ॥ अपिलीलयाकुवलयोल्लसितैरपरैःकरैःसहचरीनिहि
तैः ॥ वदनैःशुचिस्मितकटाक्षरसैश्चलकुंडलोल्लसितगंडयुगैः ॥ ३४ ॥
प्रगतासुतासुरणितैरशनामणिनूपुरैरिवतदागदिताः ॥ अनुवीक्षितुं
तनुविलासमिमंतरुणाभवत्यथनिवृत्तमुखाः ॥ ३५ ॥ अनुपालिताः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वदयितैर्दयिताःकथमप्युपेत्यकुचभारनताः ॥ शनकैःपुनस्तदवलं
बबलात्किलताविशंतिपरमोपवनं ॥ ३६ ॥ हसितप्रसूननिकरोरु
भरप्रणमत्सुवर्णमणिसर्वतरून् ॥ उपगूहयन्नमृतसिंधुसखःपवनोन
कस्यसुखमेधयति ॥ ३७ ॥ उपचारनंदनमिदंद्युवनंनियमेननंदय
तियन्नजनं ॥ परमेवनंदनमुपेंद्रवनंसकलंसदायदभिनंदयति ॥ ३८
वरपारिभद्रकसुकल्पतरुव्रजपारिजातहरिचंदनवत् ॥ सहितंसमादि
पदताननगैःपरिभूषयंतितदहोऋतवः॥३९॥स्मितमाधवीकुसुमरम्य
तरौनवचंपकादिकुसुमोल्लसितौ ॥ मधुमाधवौमधुपगीर्मधुरौमधुजि
त्प्रियान्प्रमदमानयतः ॥ ४० ॥ नवमल्लिकास्रजमभीष्टतमःशुचि
संभवांप्रणयिनीशिरसि ॥ कलयन्स्वयंनकुशलेतिकिलप्रतिघट्टय
त्युरुकुचावुरसा ॥ ४१ ॥ मधुरस्वरास्ततपतत्रततिप्रकटांतपांक्ति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धृतनेत्ररुचः ॥ शिखिनोनुयांतिहिसहस्रदशंजलदर्तुलक्ष्मनिजनृत्त
महे ॥ ४२ ॥ शरदोल्लसत्कुवलयेक्षणयाविकचारविंदरुचिराननया ॥
प्रिययाचशोभनशुकस्वनयारमतेजनोमुखरहंसकया ॥ ४३ ॥ अ
भिनंदयन्हिमऋतुंसुसखास्फटिकाचलच्छलहिमाधिकृतं ॥ फलि
नीकुलंकुसुमयन्छिशिरोहसतीवफुल्लनवकुंदरुचा ॥ ४४ ॥ हिमशी
तवर्षपरितापपुरःसरदोषमूलमिहनर्तुगणः ॥ प्रियमेवसाधयातिनि
त्यमहोसविमुक्तिमानितिविमुक्तिमतां ॥ ४५ ॥अमृतस्रगुत्तमफलप्र
सवानमृतायतत्रजनतार्पयति ॥ उपभोक्तुमप्यविधिबंधवशाप्रकृतिं
प्रयातिसकलोपिसदा ॥ ४६ ॥ प्रमदातिरेकमुपयातवताप्रमदाग
णेनचरतोपवने ॥ उपगीयतेस्ममधुरंमधुजिच्चारितंसकांततातिनास
ततं ॥ ४७ ॥ ललनाललंत्यभिवरंप्रवरा ललितालुनंतिकुसुमानिप

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राः ॥ इतराःस्त्रजोविरचयंतिपतीननुरंजयंतिनतुकाश्चनना ॥ ४८ ॥
वनलीलयाविविधयामुदितास्तरुणाघनस्तननतास्तरुणीः ॥ सुल
तालयेषुपरिरभ्यरतिंवदनारविंदमधुपादधति ॥ ४९ ॥ रसिकाः
सुधाप्सुसरसीषुततोरुतनूपुरानुकृतसारसकाः ॥ विहरंतिसाकमव
गाह्यधवैर्जलमंडुकोत्सवहसद्वदनाः ॥ ५० ॥ विविधाविधायविह
तीःसलिलेविकटेषुविद्रुमतटेषुगताः ॥ सुरभिंसुवर्णमथवर्णकमाद्द
तेसखीकरगतंमहिलाः ॥ ५१ ॥ जघनांशुकैरवयवाभरणैःकुचकुंकुमै
श्चकचमाल्यवरैः॥नयनांजनैरपिमिथोद्धदृशांघटितैरलंकृतिरलंक्रिय
ते ॥५२॥ तनुमध्यमानिजगृहाणिगताःसममात्मनामसुसमैरसमैः॥
अमृतंपिबंत्यसुलभंभाविभिश्चषकैर्महारजतरत्नमयैः ॥ ५३ ॥ मृदु
कम्रशय्यमनुरागवतांमणिमंचमाचितदृशोवसरे ॥ पतिचोदिताअ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धिरुहंतिशनैर्विनयोहिभूषयतिसर्वरसं ॥ ५४ ॥ अभिकांतमुन्नमि
तकांतकुचाकिलबध्नतीसकुसुमांकबरीं ॥ सुमुखीसुलक्ष्यभुजमूलव
लिःपरिरभ्यतेप्रणयिनातिरसात् ॥ ५५ ॥ पृथुवृत्ततुंगकठिणोरसि
जद्वयवारितायतनिजांतरयोः ॥ भुजयोर्युगेनरमणोरमणींपरिरभ्य
कोत्रनरमयेन्नसुखी ॥ ५६ ॥ स्मितफुल्लमुल्लसितचिल्लिलसन्मणिकुंड
लंमृदुकटाक्षपटु ॥ निभृतोनिरीक्ष्यसुचिरंसुतनोःप्रतिचुंबतिप्रियत
मोवदनं ॥ ५७ ॥ नतमुन्नमय्यमुखचंद्रमसंपरिरंभसंभृतमुदासुदृ
शः ॥ उपरम्यतेनतरुणेनचिरंमधुराधरामृतरसंपिबता ॥ ५८ ॥ सु
रतोत्सवोत्सुकतयात्वरयन्नूकरपल्लवंनिवसनग्रहणे ॥ कररुध्दमाय
तदृशःसहसात्वरयत्यथद्विगुणमिष्टतमः ॥ ५९ ॥ रभसावपातितपृ
थूरसिजःपरिरभ्यतत्क्षणवियाततरः ॥ भणितादिसौरतवितानपटूर

CC-0. Gurukul Kangri Collection, Haridwar

मयत्यमून्युवतिसंघउत ॥ ६० ॥ अतिलौकिकान्रमयतां रमणान्
रमयंत्यलौकिकगुणाललनाः ॥ अनुरूपरूपमतिलोकसुखंतदलौकि
कंनिधुवनंलसति ॥ ६१ ॥ नरतिःश्रमादिखचितानियमात्विरहव्य
थापिनवधूवरयोः ॥ प्रतिकामिनीप्रणयतःकलहोनसमस्तदोषरहि
तेहिपदे ॥ ६२ ॥ सुखसंविदात्मकतयावपुषांसुरभित्वमेवबहिरंतर
पि ॥ हरिधाम्निदंपतिगणस्यततोननुमान्यतेपिमुनिभिःसुरतं ॥६३॥
शृणुताप्यलोकविषयंविषयंसकलस्यमुक्तनिकरस्यदृशां ॥ वपुरिंदि
रापातिरमंदरसंननुसुंदरंप्रकटयत्यनिशं ॥ ६४ ॥ मणिराजिराजि
तमहामुकुटंशितिकांतकुंतलसहस्रतयं ॥ अलिकार्धचंद्रविलसत्तिल
कंश्रवणोल्लसन्मकरकुंडलयुक् ॥ ६५ ॥ परिपूर्णचंद्रपरिहासिमुखं
जलजायताक्षमरुणोष्ठपुटं ॥ हसितावलोकललितैरतुलैरभिनंदय

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्प्रणतमात्मजनं ॥ ६६ ॥ नवकंबुकंठमहिमांशुमहोमहिमोपलेंद्रव
रहारधरं ॥ रमणीयरत्नगणवित्धलसद्वलयांगुलीयकवरांगदवत् ॥
॥ ६७ ॥ रविचक्ररुक्प्रकरचक्रकरंविधुबिंबकंबुमधुरांबुरुहं ॥ ज्वल
नज्वलद्गदमुदारधनुःपृथुवृत्तहस्तमतिताम्रतलं ॥ ६८ ॥ वरपी
वरांसमधिराजदुरोमणिमंटपाग्र्यविलसत्कमलं ॥ सजगाद्विसप्त
कतनूदरकंशुभनाभिकंजगतकालिनुतं ॥ ६९ ॥ अतिकांतकांचिप
दकांचिमिलत्तपनीयभंगरुचिपिंगपटं ॥ वरहस्तिहस्तसदृशोरुयु
गंक्रमवृत्तचारुतरजंघमुत ॥ ७० ॥ वरनूपुरंपरमरुक्प्रपदंनवविद्रुम
द्युतिनखावलिमत् ॥ अरिवारिजध्वजकलंकलसत्पदपांसुपावितज
गत्त्रितयं ॥ ७१ ॥ निखिलागमावगमितैरमितैःसुखसंविदादिभिर
नंतगुणैः ॥ प्रपदादिकांतसकलावयवाकृतिभिःसदैक्यवददोषलवं॥

CC-0. Gurukul Kangri Collection, Haridwar

॥ ७२ ॥ अधिकारिणांगुणविशेषवशाद्विपदाद्यनंतचरणांततया ॥
अतिभासितंघनगुणापघनैरितरैश्चतत्तदुचितैरुचिरैः ॥ ७३ ॥ नव
भानुभाःकनककांतिपरंवरहारहारिहरिनीलहरित् ॥ शबलप्रभादि
विविधद्युतिमत्सुखबोधसौरभसुरूपगुणं ॥ ७४ ॥ आश्चर्यरत्नेष्व
धिकंजगत्त्रयेप्याश्चर्यमाश्चर्यमहोमुहुर्मुहुः ॥ सौंदर्यसारैकरसंरमा
पतेरूपंसदानंदयतीहमोक्षिणः ॥ ७५ ॥ ईज्यतेयज्ञशीलैःसयज्ञःप्रा
ज्ञमध्येपरःप्रोच्यतेन्यैः ॥ गीयतेगेयकीर्तिःसुगीतैर्विध्यबद्धैःसदानं
दसांद्रैः ॥ ७६ ॥ वैकुंठेतेश्रीविशेषाजनानामत्याश्चर्यंचित्तवाचामभू
मिः ॥ वैकुंठेतेश्रीविशेषाजनानामुक्तश्लाघ्येयुक्तमेतादृशत्वं ॥ ७७ ॥
यंयंसुखीकामयतेर्थमत्रसंकल्पमात्रात्सकलोपिसस्यात् ॥ इत्येववेदा
अपिवेदयंतिमुक्तिततःकोविभवांतिरेकः ॥ ७८ ॥ महानंदतीर्थस्ययं

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यभावंमनोवाग्भिरावर्तयंतेस्वशक्त्या ॥ सुराद्यानरांतामुकुंदप्र
सादादिमंमोक्षमेतेभजंतेसदेति ॥ ७९ ॥ इतिश्रीमत्कविकुलतिलक
त्रिविक्रमपंडिताचार्यसुतनारायणपंडिताचार्यविरचितेश्रीमत्सुमध्व
विजयेमहाकाव्येआनंदांकेएकादशःसर्गः ॥ ११ ॥ ॥छ॥

॥ श्रीनृसिंहायनमः ॥ तत्रानंतस्वांतवेदांतिसिंहेमुख्यव्याख्यानि
स्वनेजृंभमाणे ॥ सद्योमायद्वादिदंतींद्रभीमेभेजेक्षोभोमायिगोमा
युयूथैः ॥ १ ॥ संभूयामीचोलजह्वापिपुर्योःपार्श्वेपापामंत्रयामासुरु
ग्राः ॥ सासूयाभूभवणेवायुदेवेमूढायद्वत्धार्तराष्ट्रांतिकेप्राक् ॥ २ ॥
सन्मात्सर्यंबंधुमूचेशुभानांवाचालोलंकोपिगांधारकस्य ॥ मध्येतेषां
नीचनीत्यासमानोवाचालोलंकोपिगांधारकस्य॥३ एकंतत्त्वंवष्टिमाया
मयीयंवाक्यैःप्राच्यैरप्यवाच्यंविधत्ते ॥ पूर्वापूर्वांहंतदौर्घट्यभूपाचि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रंचित्रंदर्शनाचार्यनीतिः॥ ४॥ मर्त्यामर्त्यामर्त्यविद्विट्पुरोगंविश्वंदश्यं
विप्रचंडालपूर्वं ॥ भेदापेतंभेदिमानैःसमानैःसाधीयःकःसाधयेत्तामल
ब्ध्वा ॥ ५ ॥ सत्यंसत्यंव्यावहार्यंविधत्तेसर्वंमोहेसर्वनिर्वाहिणीसा ॥
ज्ञानेजातेदग्धवस्त्रप्रतीतंपश्चात्तस्मिंस्तप्तलोहाप्सवार्वत् ॥ ६ ॥ ज्ञानि
श्रेष्ठश्रेष्ठविज्ञानिवर्गैर्नैर्गुण्यस्थेसांप्रतंनाथभूताः॥ आक्रंदंमेहंतशृण्वं
तुसोयंहाहामायावादउत्सादमेति ॥ ७ ॥ भ्रष्टाआह्वानप्रभाकृत्प्रभा
भूत्त्रस्तामाहायानिकाद्याश्रयत्र ॥ दुर्गमायावादसत्रंदिधक्षुर्नोपे
क्ष्यानस्तत्त्ववादाग्निजिव्हा ॥ ८ ॥ यंयंप्रापद्भूरिचिंतःप्रदेशंतस्मा
त्तस्मादागतेरंतरायः ॥ प्रत्यज्ञायिव्यक्तमार्येणसोपिप्राप्नोत्पार्श्वेहा
वयंभाग्यहीनाः ॥ ९ ॥ प्रश्नःप्रष्टुःखंड्यतेतेननूनंयुक्तांयुक्तिंवक्तिचा
सावखंडयां ॥ वादिव्रातंलज्जयेन्नोविशेषादाक्षेप्तेतिश्रूयतेकिंनुकुर्मः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ १० ॥प्राच्यंशास्त्रंयत्सपादंतुलक्षंवाक्यैनैकेनाक्षिपत्धर्षतीर्थः ॥ इ
त्थंपांथैर्वर्णितंशृण्वतःप्राग्युष्मान्प्रापद्दूयमानंमनोमे ॥ ११॥वेदव्या
सोन्वेषवेदोनुमूर्तोदिव्यामुर्तिर्यस्यसासुस्मितस्य ॥ तद्वद्दृणांचेतिवाणी
कृपाणीनूनंमायापक्षमूलंछिनत्ति ॥ १२ ॥ अक्लिष्टंतत्सूत्रभाष्यंबली
योमानोपेतंकाक्षातिर्नस्तथाचेत् ॥ आस्माकाःकेप्येवमुक्त्वाविलज्जाल
ज्जासिंधौदुःसहेमज्जयन्नः॥१३॥ तस्यव्याप्तैःशिष्यजालैस्तुगौणैःसंस
र्तिसिंधौशंखचक्रादिभृद्भिः ॥ मार्गह्येरनूविश्वसत्वांतराणिक्षेमाप्त्यैन
स्तत्रनीतिंविधत्त ॥ १४ ॥ गौणैस्तर्कैर्गौणवाक्यानिगुप्तैर्गौणींबुद्धिं
वर्धयंतेनृणांते ॥ हंसानांनोवाग्विघातप्रवीणाःसिंधुंभूयोवारिवर्षैरि
वाब्दाः ॥१५॥ बाहुल्येनह्येतदुक्त्वाखलुद्रागेतेविश्वंव्याप्नुवंतिप्रकामं
॥ अस्मिन्नस्मद्दर्शनापायकालेयद्वल्लोकापायकालेलयापः ॥ १६ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आकर्ण्यैत्थंतस्यवाणीमथान्योमानीतेषांमानिनांचित्तवेत्ता ॥ स्वानांच
तोनंदयन्मंदचेताधृष्टामुच्चैर्वाचमाचष्टकष्टः ॥१७॥तेजःशंकामात्रतो
यद्विलीनंधिग्भीरूणांमानसंमानहीनं ॥ एकांतेनप्राप्ततेजोविलीनं
स्थेयोयस्माद्भातिहय्यंगवीनं ॥१८॥ येषांविद्याशांकरीशंकरीनोदेवा
दीनांबाध्यतांसाधयंती ॥ शौक्रीवालंलज्जयेद्देवपूज्यंतेषामेषांसन्निधौ
कोविषादः ॥१९॥यद्यद्वैतंकर्कशैर्गौणतर्कैरुत्थंसाध्यंनैवभात्यस्तुताव
त्॥षट्कर्मज्ञैर्दिव्यमंत्रौषधाद्यैरेतैर्गुप्तान्नोनजेताहिकोपि॥२०॥यद्य
प्येवंनत्युपेक्ष्योविपक्षःकिंतुप्राप्तोनाधुनाक्रंदकालः ॥ अप्यद्वंद्वस्वा
त्मबोधप्रतीतैराचार्यैर्यच्छंक्यतेशंकराद्यैः ॥२१॥ पारंपर्येणागतंतत्व
शास्त्रंहंतोत्सन्नंनूतनेनेत्युदीर्य ॥ तेषांदोषावर्णनीयाविदग्धैःसंतोसं
तोवापिमध्यस्थलोके ॥ २२ ॥ स्वाभिप्रायोब्रह्मवत्स्यादवाच्योमाया

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शक्त्यासर्वानिर्वाहसिद्धिः ॥ इत्थंनीत्याशास्त्रनीत्येवबाध्यःसर्वोलोकः
स्वात्मनोयःपरःस्यात् ॥ २३ ॥ ग्रामेग्रामेवार्यतांमाननैषांपूर्वंपूर्वं
सामपूर्वैरुपायैः ॥ संप्राप्तानांमानभंगायकार्यंग्रंथाकर्षाद्युद्यतैरस्म
दीयैः ॥ २४ ॥ इत्याद्येतेकार्यमालोच्यकालेचक्रुर्वंकाश्चाङ्कभक्तप्र
तीपं ॥ योग्यामंक्तुंतेन्यथास्युःकथंवादुःखोग्रांभस्यंधतामिस्त्रासिंधौ ॥
॥ २५ ॥ व्रत्याकारंवासुदेवाह्वयंतंप्राज्ञंमन्यंपुंडरीकाभिधानं ॥ वाद
व्याजात्क्षेपकामाःकुमंत्राश्चक्रुर्यत्नंरूप्यपीठालयेमी ॥ २६ ॥ यद्व
त्सिंहंग्रामसिंहोशुचोच्छुर्हंसंकाकोयद्वदेवैकदृष्टिः ॥ यद्वन्मायीभूरि
मायुस्तरक्षुंतद्वद्विद्वद्वर्यमाव्हस्तमूढः ॥ २७ ॥ अप्यल्पोसौनत्युपे
क्षांबभूवलोलात्मेवादक्षपक्षःपतंगः ॥ मध्वेनाहोदुस्तरेणस्वभावात्ते
जोराशीराजितेनाग्निनेव ॥ २८ ॥ मानैर्मान्यैर्भासमानोसमानैराक्षि

CC-0. Gurukul Kangri Collection, Haridwar

प्यैनंस्वंमतंसाधयित्वा ॥ प्रीत्यैविष्णोरुत्तमप्रीतितीर्थौवेदव्याख्यां
वेदवेदीचकार ॥ २९ ॥ आम्नायंयेपेठुराम्नायपूर्वंप्राप्ताविप्रास्तत्र
कौतूहलेन ॥ पर्यासीनास्तावदाचार्यवर्यंप्रेक्ष्यप्रेक्षांचक्रिरेनेकसंख्याः
॥३०॥ उक्तांगेभ्यःकादिकान्व्यंजयंतंतत्तन्मात्राव्यंजनादौप्रवीणं ॥
तिस्रोवस्थास्तद्गुणैर्भावयंतंदेवाद्दृष्ट्वाव्यस्मरन्देवदेवं ॥ ३१ ॥ आ
दौन्हस्वत्वेनवत्सानुवृत्त्यामात्रापादौवर्तयन्दृश्यमानः ॥ कुर्वन्नन्या
श्चाग्र्यरूपाविवृत्तीर्गोविंदश्रीरासगोविंदभक्तः ॥ ३२ ॥ मांगल्यांग
व्यक्तभावात्त्रिलोकींरंगारूढाविस्मयंप्रापयंती ॥ कृष्णेवान्यामान्य
विन्यासपादारेजेमाध्वीसुस्वरावेदवाणी ॥ ३३ ॥ गांभीर्यौधैर्ययुक्तमौ
दार्यकार्यैर्नानानादश्लाघ्यमुच्चारणंतत् ॥ शिक्षाशिक्षालक्षणानांहिल
क्ष्यंमान्यंमन्येधन्यबुद्धेरतुल्यं ॥ ३४ ॥ कालपीःकृत्तीर्व्यंजयन्छांद

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सी:श्वव्यक्तंशास्त्रंशाब्दमुद्दाव्यभूयः ॥ सव्याचख्यावुक्तनैरुक्तमार्गो
ज्यायान्ज्योतिर्वैदिनांवदमित्थं ॥ ३५ ॥ श्रौतेव्याख्योच्चारणेचारु
र्णातिमादृग्देहीवर्णयेदस्यकोनु ॥ वागीशानैर्वाग्विहंगेशजीवैर्भूर्याश्च
यैर्वणितेयेप्रणम्य ॥ ३६ ॥ छंदःसार्थसार्थमत्रामुनेत्थंप्रोक्तंश्रुत्वाब्रा
ह्मणाब्रह्मणेव ॥ सर्वेसौम्याजिष्णुजिज्ञासयामीप्राप्यप्रोचुर्भिन्नका
याभिधानं ॥ ३७ ॥ प्राज्यप्रज्ञःप्राज्ययाप्रज्ञयासौहंतावाचन्मंत्रव
र्णाभिधेयं ॥ तत्प्रत्यर्थीप्रार्थ्यतेवक्तुमेतत्प्राज्ञास्माभिःश्रोतुकामैर्भवां
श्च ॥ ३८ ॥ इत्युक्तस्तैरेषविस्तारबुद्धेःप्राप्तुंसाम्यंसंप्रवृत्तोदुरात्मा
॥ हास्योत्राभूद्वासुदेवप्रभार्थीयद्वत्पूर्वंपौंड्रकोवासुदेवः ॥ ३९ ॥ आ
डंदेशादुत्तरंरादिशब्दंश्रुत्वानारेत्युक्तवंतंपदंतं ॥ व्याख्यालौल्यादे
तरेयादिसूक्तेपृथ्वीदेवानिंदनीयंनिनिंदुः ॥ ४० ॥ शार्दूलाख्यांप्रा

CC-0. Gurukul Kangri Collection, Haridwar

प्यसंभावितःप्राक्लोकेधूर्तोमायिगोमायुरेषः ॥ वादिद्वीपिध्वंसिनंम
ध्वसिंहंप्राप्तोहीत्थंशब्दशेषोबभूव ॥ ४१ ॥ कृष्णाभीष्टाशास्त्रविस्पष्ट
संज्ञायास्त्वीयाश्रीःपालितासद्द्विजेन ॥ पद्माख्यास्त्वैंधवेनाहृतातां
सुश्रावाग्र्यानंदतीर्थाख्यपार्थः ॥४२॥ तूर्णंतीर्णादभ्रमार्गोथसार्थःसं
प्राप्तोसौगोगणैर्भीषयित्वा ॥ संयम्यातंयंत्रकामेनहास्यंसंप्राप्तश्री
र्निर्जितंतंजहास ॥ ४३ ॥ दुष्टात्मासौभद्रमेकाकिनंयःक्षेप्तुंहेतुःसौ
ख्यदाख्यंबभूव ॥ हर्यंशोयंतंनचक्षामभूयस्तोकेसन्नेसूकरंकसरीव॥
॥ ४४॥ तस्यत्रासात्पृष्ठतस्तिष्ठतोभूत्क्षेमापेक्षीयोजनःप्राग्जितोपि
॥ मध्येन्येषांगोततीस्तत्प्रयुक्ताःसद्योजिष्णुःपंचषैर्गोविशेषैः ॥ ४५ ॥
विष्णोर्भूयःशोभयद्भिःपदांतंपारंपर्येणर्यमाणैरवार्यैः ॥ गोव्रातैस्तंदा
रयित्वान्यगृह्णात्कंजाख्यानंसिंधुपंमध्वपार्थः ॥ ४६॥ आस्तामास्ता

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेषवोविश्वमोषोरेरेमायावादिचोराद्रवेत ॥ द्रष्टाद्रष्टांनिग्रहीताध्रुवंवः
प्राप्तःकालोद्रागुहांतंप्रवेष्टुं ॥ ४७॥ तेजोवि द्धचक्रचंद्रस्यलीनांविध्व
स्तालंवादिनक्षत्रलक्ष्मीः ॥ विश्वव्याप्तंयत्तुतद्दीप्तिमूलंयुष्मत्प्रेष्टंतान्नि
रस्तंतमश्च॥४८॥पूर्वांशामापूर्यविश्वप्रकाशीगोसंदोहैःसप्तविद्याख्य
वाहः ॥ युष्माभिःकिंनैक्षिदेदीप्यतेसौदेवःसाक्षात्सर्ववित्सर्वदीपः ॥
४९॥ सर्वाधारंब्रह्मसंज्ञंविहायोरम्याकारंशारदेंदीवराभं ॥ सन्निर्णी
तंगुण्यलंशब्दभेदैर्मध्वादित्यंसंश्रितंकोपिधत्ते ॥ ५० ॥ विधावतवि
धावतत्वरितमात्रिवादासुराअदभ्रधिषणाभिधोनरहरिर्हिजाज्वल्यते
॥सयुक्तिनखरैःखरैर्मुखरमूखदुःखांकुरैर्विदारयतिदारुणप्रवचनप्रणा
दीप्रियान् ॥ ५१॥ धत्तेरूपाण्यनंतान्यपिभुवनपतेर्योत्हृदाप्येकपक्षो
दक्षःसञ्चोखिलेभ्योप्यमृतमिहददौकेवलंयोनमात्रे ॥ पक्षिश्रेष्ठोपरः

CC-0. Gurukul Kangri Collection, Haridwar

सन्नमितमतिपदेसंपदेस्यादयंवोमादर्पमायिसर्पाभजतभजतताास्ता
गुहाद्राग्द्विजिह्वाः ॥ ५२ ॥ वेदव्रातसुदर्शनःपरिलसत्तर्काख्यशंख
ध्वनिर्दिभ्राजिष्णुपुराणसंहतिगदःश्लोकौघशार्ङ्गान्वितः॥ सत्सूत्रेष्वि
तिहासनंदकचणामध्वाख्यनारायणःप्राप्तोवोनिजिघृक्षयाद्रवतहेमा
याविदेवाद्विपः ॥ ५३ ॥ इतिनिगदतिमायावादिविद्वेषवेपेशुभजनि
करेस्वारामतोस्मात्प्रयातः ॥ न्यवसदमरधिष्ण्येप्राग्न्यवाटाभिधानेगु
रुमतिराभिनंदन्देवमानंदमूर्ति ॥ ५४ ॥ इतिश्रीमध्वविजयेमहाका
व्येआनंदांकेद्वादशःसर्गः ॥ १२ ॥ ॥ छ ॥ ॥
श्रीनृसिंहायनमः ॥ पृथुदर्शनमुत्थितंकृतार्थंपृथिवीभृत्प्रणतिंगृहीतवं
तं ॥ निजशिष्यमुदेथसत्यमाप्तपुरुषःकश्चिदुपाययौकदाचित् ॥ १ ॥
भगवानिहनःस्वकिंकराणामचिरेणाव्रजतादनुग्रहार्थं ॥ इतिकार्यचि

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीर्षयार्थयत्वांनृपइत्यभ्यधितैषतंप्रणम्य ॥ २ ॥ अथमाघवतीमपा
स्यकाष्ठांव्रजताप्रैधिततेजसाप्रतीचीं ॥ परिशोधयतास्वपादसंगात्
पृथिवींप्राज्ञदिवाकरेणरेजे ॥ ३ ॥ अशुभानपहायमायिजुष्टानधमा
द्रीनिवगोत्रनिम्नगौघैः ॥ सुजनैस्तरसाभिगम्यमानःपरमस्नेहत
याक्रमप्रसन्नैः ॥ ४ ॥ सुमनःफलशोभिनोत्रपुंसोनमयन्गोभिरनोक
हानिवोच्चान्॥ अपिभंगमुपानयन्ननम्रान्दृढभावानपरानवार्यवीर्यः
॥ ५ ॥ गमनोत्सवविस्मितैर्निषेव्योविविधैर्जानपदैर्जनैरजस्रं ॥ प
रिसत्वरकीर्तिरार्तिमुक्त्यैपुरुषैर्दूरभवैश्चगम्यमानः ॥ ६ ॥ अमरैरम
रानुगैर्मुनींद्रैरपरेक्षाविषयैश्चसेव्यमानः ॥ हरिपादसरोजसंगसारो
भुवनेपावनपावनोनिकामं ॥ ७ ॥ अयमप्रतिवारणःप्रयाणेपरमानं
दसुतीर्थसूरिराजः ॥ विबभावतिवेलमच्छरूपःसुरसिंधोरिवसंततप्र

CC-0. Gurukul Kangri Collection, Haridwar

वाहः ॥ ८ ॥ समयेनगतोमहीयसासौविषयंस्तंभपदोपसर्जनाख्यं
मदनाधिपतेःसुधामधामप्रविवेशाखिललोकवंदनीयं ॥ ९ ॥ क्षणदा
मिहतावदूषिवासंविहिताहर्मुखयोग्ययोगमेनं ॥ गमनोद्यमलक्षणै
रजानन्नूगमनायोद्यतमाशुशिष्यसंघाः ॥ १० ॥ पुरतोविसृताःसमा
धिशुध्यैयतयस्तत्रपटीःकषायवेषाः ॥ सहसोदहरन्स्वयोग्यमुद्रा
युतदंडादिकधारणोद्यमेन ॥ ११ ॥ अवधार्यविशेषकारिशंखप्रकटां
कान्सुधियागतार्द्रभावान् ॥ लसितातुलसीस्रगस्यकंठेहरिनिर्माल्य
तयोचितान्यधायि ॥ १२ ॥ यतधीर्गुरुचक्रिमूर्तिपूर्णयतनिश्वासव
शाविशोध्यपाणी ॥ गुणकुंडलमंडितंविमानंगुणबद्धंकवचावृतंबभा
र ॥ १३ सकमंडलुमंडलावलंबंस्वयमेवालघुपुस्तकादिभारं ॥ युव
शिष्यगणोदधेनयत्नान्नहिदाक्ष्यस्यसमोगुणापरोस्ति ॥ १४ ॥ अति

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संभ्रमतःपरिभ्रमंतंभरदामानवलोकिनंचिराय ॥ अनुयोगपरंमुहुःप्र
मत्तंजहसुर्नूतनशिष्यमत्रकेचित् ॥ १६ ॥ अथतत्क्षणघट्टितोरुघंटा
घननादव्यपदेशतःपरेण ॥ अमितप्रमतिःप्रचोदितोसाविवितिनिर्यत्सु
निजेषुनिर्जगाम ॥ १६ ॥ धृतमातपवारणंवरेण्यंव्रतिराजंतमुपर्युप
र्युदारं ॥ उदयन्मिहिरोपरिष्ठपूर्णद्विजराजश्रियमाययावभूतां ॥
भुवनत्रयधारिणंमुकुंदंदधदंतःसदधेगुरुःस्वयंच ॥ अपिकेनचिदित्य
दोनचित्रंननुसप्राणपतिर्बभारतंच ॥ १८ ॥ यतयोगृहिणोथवर्णिमु
ख्याःश्रुतिगास्त्यक्तनिषिद्धकाम्यभावाः ॥ इहमूर्तिधराइवस्वधर्मा
शतसंख्याःशतसंख्यमन्वगच्छन् ॥ १९ ॥ परिवारजनानमार्गदुःखं
प्रययुःपूरुषरत्नमीक्ष्यमाणाः ॥ इतिनाद्भुतमस्याहिप्रयांतिस्मृतिमा
त्राद्भविनोभवापवर्गं ॥ २० ॥ मदनेश्वरवल्लभप्रदेशेप्रभुमायांतम

CC-0. Gurukul Kangri Collection, Haridwar

थाश्यपद्यतद्राक् ॥ जयसिंहइमंनृसिंहवर्यःशुभधीःस्तंभविशिष्टासिं
हनामा ॥ २१ ॥ अवतीर्यपुरैववाहनात्स्वादपिमार्गादपसार्यसैनि
कान्सः ॥ सहकैश्चनभूसुरैरवाप्तस्त्रिजगत्पूज्यपदांतिकेननाम ॥
॥ २२ ॥ पृथिवीपतिनानुगम्यमानोविनयाद्भक्तिरसार्द्रमानसेन ॥
अचिरेणसविष्णुमंगलस्यप्रययावायतनोत्तमस्यपार्श्वे ॥ २३ ॥ नरदे
वदिदृक्षयासमेताउभयग्रामजनाजनाःपरेच ॥ उपयांतमनंतमानसं
तंमुहुरैक्षंतकुतूहलाब्धिमग्नाः ॥ २४ ॥ पुरतोमधुरस्वरैर्वदद्भिःस्वकृ
ताःकर्णसुखामुकुंदगाथाः ॥ धृतपंकजबीजचक्रचिन्हैःकृतनृत्यैश्चतुरै
र्निषेव्यमाणं ॥ २५ ॥ कलितांजलिनास्फुटानुयांतंजनसंबाधसहेन
भूमिभर्त्रा ॥ करुणाविषयंचिकीर्षुणास्वंव्रजताकिंकरतामकैतवेन ॥
॥ २६ ॥ इदमित्थमितीक्षणैर्नराणामपरिच्छेद्यमहिष्ठधामरूपं ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिकंधरिणीमलंचिकीर्षुस्फुटमुद्यंतमिवद्युनाथमन्यम् ॥ २७ ॥
अशनैःशनकैरिवाव्रजंतंयुवसिंहप्रवरप्रगल्भयानं ॥ अतिपाटलपा
दपल्लवाभ्यामवनिंपावनतामलंनयंतं ॥ २८ ॥ नखनिर्जितपद्मराग
रागंवरकूर्मप्रपदंनिगूढगुल्फं ॥ सुरवर्यकराग्रसेव्यजंघंद्विरदोदारक
रोपमोरुयुग्मं ॥ २९ ॥ शुभशुल्धनितंबबिंबराजन्नवकौशेयविशेषबा
ह्यवस्त्रं ॥ तनुकुक्षिगलालिकेषुरेखात्रितयेनप्रकटेनशोभमानं ॥३०॥
मृदुसूक्ष्मघनारुणाविकाच्छप्रकटप्रावरणेनभासमानं ॥ अतिनूतन
तिग्मभानुभासांनिकरेणेवसुवर्णसानुमंतं ॥ ३१ ॥ पृथुवक्षसमुन्नतां
सभित्तिंगुरुवृत्तायतल्द्वद्यबाहुदंडं ॥ परमारुणपाणिपल्लवांतःस्फुरितो
र्ध्वध्वजलांछनादिमंतं ॥ ३२ ॥ परिपूर्णशशांकबिंबशंकाविषयंप्राक्
सहसावलोकनेन ॥ अकलंकतयापरंविविक्तंवदनंबिभ्रतमच्छविभ्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माब्धि ॥ ३३ ॥ अतिसुंदरमंदहासराजन्नवकुंदाभरदंशुभारुणो
ष्ठं ॥ कमलायतलोचनावलोकैरपिलोकान्सकलान्प्रहर्षयंतम् ॥
॥ ३४ ॥ अतिभासुरकर्णभासितश्रीतुलसीगुच्छमतुच्छकांतिगंडम्
॥ भुवनत्रयभूत्यभूतिदानेचतुरभ्रूवरविभ्रमंसुमौलिम् ॥ ३५ ॥ स
कलावयवान्स्फुटंमिमानाःप्रतिमालक्षणदर्शनायलक्ष्यम् ॥ चतुरा
विदधुर्यदीयगात्रंससुलक्ष्मेत्यधुनानिगद्यतेनो ॥ ३६ ॥ अविलो
लदृशांसमीक्षितुंस्वंजनसंबाधभयेनदूरभाजां ॥ समदर्शयदूर्ध्वमौर
सोसौदययेवोरुजनौघमध्यगोपि ॥ ३७ ॥ सविकासदृशांकृतांजली
नांजनतानांपरमादरान्नतानां ॥ वलयेनवृतःप्रियंमुरारेःप्रविवेशाय
तनंप्रवर्हबोधः ॥ ३८ ॥ विविधप्रभुमध्यसंन्निषण्णोनरदेवेनसमंसगू
ढदेवः ॥ विबभावुडुराडिवोडुमध्येसहमह्यास्तनयेनपूर्णबिंबः ॥ ३९

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवदत्सकथांरथांगपाणेर्भगवान्भागवतेभवापहंत्रीं ॥ अनुरूपगुण
स्वरादिभाजानिजशिष्यप्रवरेणवाच्यमाने ॥ ४० ॥ कथनंतदुदार
धैर्यसारंमधुरंपुष्कलभाववत्प्रसन्नं ॥ विदुषोविदुषोत्रशृण्वतोलंव्यधि
तानंदरसांबुधौनिमग्नान् ॥ ४१ ॥ गमनासनसंकथादिलीलाःस्मृति
मात्रेणभवापवर्गदात्रीः ॥ कथमप्यमराःप्रपंचयेयुर्ननुमध्वस्यनमादृ
शोल्पबोधाः ॥ ४२ ॥ सुतपःकवितादिसद्गुणानांलिकुचानांकुलजोंगि
रोन्वयानां ॥ अभवद्गुहनामकोविपश्चित्कविवर्योखिलवादिवंदनीयः
॥ ४३ ॥ दयितास्यसतीगुणानुरूपाविधिवीर्येणमुहुर्मृतप्रजापि ॥ अ
भजद्भुवनप्रभूहरीशौसुतकामावसुदेवसूनुभक्ता ॥ ४४ ॥ परमेश्वर
योःप्रसादयोगात्सुतरत्नंतदसूतसूरिपत्नी ॥ परिषत्पदपत्तनेषुनार्घो
विविदेयस्यसमःपरीक्षकाग्र्यैः ॥ ४५ ॥ वदनेंदुमवेक्ष्यनंदनस्यस्व

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलोत्तारणदक्षलक्षणस्य ॥ कृतकृत्यतयाक्रियाःप्रकुर्वन्कविराख्या
दुचितांत्रिविक्रमाख्यां ॥ ४६ ॥ कलभाषणएवसूरिपोतःकविरासी
दनवद्यपद्यवादी ॥ अवभातिननुप्रभाप्रभावीभगवान्बालतरोपिति
ग्मभानुः ॥ ४७ ॥ सकलांगयुतावभातशाखःसमयेप्राप्तउदारपाक्षि
सेव्यः ॥ ससर्जसदध्वगोपकृत्यैलिकुचःकाव्यफलंरसाभिरामं ॥
॥ ४८ ॥ प्रतिपादितमात्मनायथार्थंपृथुमायासमयस्यदुर्घटत्वं ॥ स्व
गुरौपरिहर्तुमक्षमेपिश्रुतवांस्तंसवयस्यबोधितोलं ॥ ४९ ॥ भगवत्पु
द्वितेसगोविलासेबटुभावंत्यजतित्रिविक्रमार्ये ॥ अपिभानुपुरःसराःस
मस्ताःप्रययुःकीटमणिप्रभत्वमाशु ॥ ५० ॥ अतिदक्षमतिंसपादलक्षे
समयेमायिजनस्ययुक्तिशूरं ॥ महितांहिमहीतलेमहिम्नाजनकोनंदन
मब्रवीदुपांशु ॥ ५१ ॥ शृणुवाचमिमांविचारितार्थानकलौनिर्गुणभा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनासुखाय ॥ इतिगौणविमुक्तयेगुणाढ्यंस्मरदेवंसुतवासुदेवमेव ॥
॥ ५२ ॥ इतितातवचोनिशम्यकिंचित्तरलात्मापिविचार्यशास्त्रसारं ॥
परमेवसपारमारुरुक्षुर्विगुणोपास्तिमुपाशृणोत्परेभ्यः ॥ ५३ ॥ नि
जधर्मरतोग्रहिप्रबर्हःकलिकालाकुलितांतरोपिहंत ॥ नितरांनिशिता
त्मनानिसर्गात्स्फुटमालोचयदित्यसौकदाचित् ॥ ५४ ॥ रचितंननु
सूत्रमत्रमानंविदुषासत्यवतीसुतेनसाक्षात् ॥ अपरस्परसंगतानिभा
ष्याण्यथसर्वाणिनमानतांव्रजेयुः ॥ ५५ ॥ यदितेपुनिराग्रहांतरास्मः
सुघटंनोपलभामहेहिकिंचित् ॥ नतथापिपरंपरोपयातंनपठामःप्रण
येनसांकरीयं ॥ ५६ ॥ घटनोपनिषत्सुनाल्पबुद्धेःसुघटेत्यभ्युपगम्य
चिंतयामः ॥ नविमुक्तिमुपैतिकोपिमुक्तासमयोक्तामिहयामिमामुपा
स्ति ॥ ५७ ॥ विततःसुखसच्चिदद्वयात्मासमुपास्योविहितोहितत्व

CC-0. Gurukul Kangri Collection, Haridwar

विद्धिः ॥ सचनावयवीनिरूप्यतेचेत्द्युतिमात्रंचनहीत्यदोरहस्यं ॥
॥ ५८ ॥ यदिचेद्दगुपास्यतेस्यरूपंतिमिरत्वेनविभातिपारिशेष्यात् ॥
फलमप्यथमुक्तिरीदृशीस्यादितिनोनैवधिनोत्युपास्तिरेषा ॥ ५९ ॥
अथवेदपुराणभारतादिस्वयमालोच्ययथावबोधमत्र ॥ गुणवंतमुपा
स्महेमुकुंदंस्मृतिधर्मान्भृशमाचरंतएव ॥ ६० ॥ अवधार्ययदेतिकार्य
मार्यःसविवेकादुपचक्रमेविधातुं ॥ परिपूर्णमतेर्जगत्सुकीर्तिपरिपूर्णा
मशृणोत्तदाविशुध्धां ॥ ६१ ॥ विहिनस्तिहिनोजनोतिवाग्मीसमयं
कोपिपरंपरोपयातं ॥ क्षिपतंत्वमुदारयुक्तिशूरोनपरेतत्रसमर्थतांव्रजे
युः ॥ ६२ ॥ तववेदनदीर्विगाह्यभूयःसमयांभोधिषुकुर्वतोविहारं ॥
नवकाध्यरसप्रियस्यवादिद्विरदेंद्रप्रतिवारणोनजज्ञे ॥ ६३ ॥ उपया
हियशःशशांकगौरंनिजयूथस्यभयंनिराकुरुत्वं ॥ अधुनाविधिनोपपा

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दितंतंप्रतिवादिप्रतिवारणंनिवार्य ॥ ६४ ॥ इतिमायिजनेनतत्रतत्र
स्वजनत्वेनसतावदर्थ्यमानः ॥ अनुकूलवचामहिष्ठमानोमनसासंशय
मापसंशयच्छित् ॥ ६५ ॥ सितमध्ववचःसृणिप्रयोक्तॄन्पुरुषानेषवि
षादयन्कवीभः ॥ विविधोत्तरधूलिपातनेनप्रतिघेनाधिकमंधयांचका
र ॥ ६६ ॥ क्षणदासुविचक्षणःसवीक्ष्यप्रचुरप्रज्ञमनोज्ञशास्त्रसारं ॥
अपराविदितःप्रसादगर्भंविदधेविस्मयमांतरंमहांतं ॥६७॥ विदितवा
न्व्यवहत्यसुदर्शनंबहुलबोधमवेक्ष्यसनिश्चयात् ॥ अपिनतस्यमतंस
हसाददेननुविमृश्यकृतीकुरुतेखिलं ॥ ६८ ॥ तंविष्णुमंगलगतंबहु
लप्रबोधंप्राप्याभ्यवंदततदायुगविक्रमार्यः ॥ आनंददंसचतुराननहा
सलक्ष्म्यातलंप्रवेत्तुममरेंद्रइवाब्जयोनिं ॥ ६९ ॥ इतिश्रीमत्कविकुल
तिलकत्रि०मध्वविजयेमहाकाव्येआनंदांकेत्रयोदशःसर्गः ॥ १३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीनृसिंहायनमः ॥ परिवृढघनसंघेराजसिंहोर्जशक्त्यात्यजतिमलिनभावंनिरसत्वान्निकामं॥स्फुटमुदयतितेजस्व्युज्ज्वलेमध्वभानौसुजनजलजकांत्यैविश्वमासीन्मनोज्ञं ॥ १ ॥ कृतमपकृतमार्यैःक्षम्यतांक्षांतिभूषैरितिमृदुवदतांसंप्रार्थनाभिःप्रभूणां ॥ अपहृतमपरेषांमंत्रतोग्रंथजातंदशहृदयनियोगादग्रहीच्छंकरार्यः ॥ २ ॥ परिवृतमवनम्रैर्ग्रामणीग्राम्यपूर्वैरवनतमुरुचेतःपादपार्श्वेनृसिंहं ॥ सहजविजयतोयुग्विक्रमार्यःप्रसंन्नःकविकुलतिलकोसावाशिषातोषयत्तं ॥३॥ उपचरतिनितांतंहंतपौरंदरीधूर्द्धुसदासिभजतोयंदुर्लभादभ्रभाग्यैः ॥ दिशतुसपरमानंदाद्वयतीर्थांघ्रिरेणुर्धरिणिधरसुखंतेसंततंस्वांतरेति ॥४॥ अनतिपरिचितस्याप्यस्यसोयंकवींद्रोगुणरसमतिगूढंज्ञातवानित्याचित्रं ॥ मधुमधुकरराजोनिष्पतन्पौष्यमाप्तुंननुपरिचयहीनःकाननेपि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभुःस्यात् ॥ ५ ॥ अखिलखलकुलानांवर्धयन्द्वेषदोषंविदधदपिन
राणांकौतुकंमध्यमानां ॥ स्वगतिसमुचितानांभूतिदायीशुभानांबहु
लदृदिङ्गनिन्येशर्वरीःकाश्चिदेवं ॥ ६ ॥ उदयतिविनतायानंदनेश्ला
घ्यकालेसकृतसकलकृत्यःकृत्यवेदिप्रवेकः ॥ अरुणयवनिकांतर्ब्रह्म
नारायणाख्यंगुरुगुणमभिदध्यौयोग्ययोगासनस्थः ॥ ७ ॥ अति
धवलितदंतादंतकाष्ठैःप्रशस्तैरपियुगपदनेकेसस्नुरत्रव्रतींद्राः ॥ गुरु
भिरभिहितेष्वाचारभेदेपुनिष्ठांस्फुटमवगमयंतःसौष्ठवात्कर्मणांच ॥
॥ ८ ॥ चरमसमयसुप्ताःपूर्वमुत्थायशिष्यागुरुजनपरिचर्यांचक्रिरे
दुष्करांच ॥ सबहुमतितदाद्यप्यार्धरात्रात्प्रसन्नाःसुगतिरपरथैषांस्या
त्कथंकारमिष्टा ॥ ९ ॥ श्रवणमननहेतोःप्राक्चिरायास्तनिद्रःसप
दिविवशयंत्यानिद्रयाग्रस्तचेताः ॥ स्वयमपिनयतिद्रागंगवस्त्रादिपू

CC-0. Gurukul Kangri Collection, Haridwar

ज्येझडितिविगतनिद्रः कोपिशिष्योन्वशेत ॥ १० ॥ विहितमविहितं प्रागेवकस्माद्विनिद्रैरितिगुरुपरिवादाशंकयानम्रगात्राः ॥ चिरमनवतरंतः श्रावकामुक्तमार्गागुरुषुजलसकाशस्थेषुतूष्णीमतिष्ठन्॥ ११ ॥ विपुलहृदयपार्श्वेदीपदीप्तिप्रदीप्तेदरवरपरिपूर्णैर्वार्भिरर्घ्यादिदत्वा ॥ यतिरलियतचेताश्चक्रिणोर्चानिकायात्कुसुमसमितिमग्र्यामादरादुज्जहार ॥ १२ ॥ अमृतमापिनिरीक्ष्यस्त्राविनिर्माल्यसूनेघृतमिदमितिसद्योभ्रांतिमंतोपिशिष्याः ॥ श्रद्दधुरधिकवाक्यैर्विभ्रमास्तच्चपश्चादनुदिनममृतान्नैस्तस्यसेव्यस्यशक्त्या ॥ १३ ॥ अगमदुचितमंत्रैस्तूदयानांत्रयाणांकृतिभिरनुमतात्मातत्रपंचांगविद्भिः ॥ उदयमहिमरोचिश्चक्रवर्तीत्रिशक्तिर्दधदतिबृहदंतःषड्गुणंस्वात्मतेजः ॥ १४ ॥ गतिमिरनिकरकुंभिव्रातमत्यंततीव्रांस्थिरतरमखिलानांप्राणिनांरुत्धमार्गं

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुवनभवनपूर्णंभानुमानंजनाभंहरिरिवनखरैः प्राग्रश्मिजालैर्निरासं
॥ १५ ॥ मधुरपतगरावाःशांतनैशांबुबाष्पाः सपदिविपुलरागाःस्वा
भिसारात्प्रसन्नाः ॥ अरुणतरणिरत्यच्छांबरादिक्पुरंध्रीः स्मितसरसि
जवक्त्राःस्वैःकरैरालिलिंगे ॥ १६ ॥ प्रणतिरभसधूलीवत्धशोभावि
शेषाद्धुरुपकृतिमत्तांसाधुजालांतराप्ताः ॥ समयमुपनतंसंवेदयंतोवय
स्याइवदशशतकेतोःकेतवःश्रावकाणां ॥ १७ ॥ निहितमुचितमुच्चं
योगपीठंप्रवक्तुःपरिषदिपरितोमीसत्वराःसत्वभाजः ॥ द्रुतमवसितकृ
त्यैर्धन्यसन्यासिसंघैःश्रवणपरमकृत्यायोपतस्थुःसमेताः ॥ १८ ॥ ब
भुरमलगुणानांशोभनाच्छादनानांमुररिपुनिलयानांहंतवेदांतकीनां
॥ सपदिसुविवृतानामंतरर्थाधियांवाविविधकवलिकानांसंचयाःपत्रि
काणां ॥ १९ ॥ अनतिविरलभावाअप्यनन्योन्यसंगाऋजुतरतत

CC-0. Gurukul Kangri Collection, Haridwar

नानापंक्तिसाम्याप्तशोभाः ॥ द्विरदतुरगदेश्याद्दूरतोवर्जितांताःकुश
ललिखितरूपारेजिरेतेषुवर्णाः ॥ २० ॥ झडितिददृशुरेकेवाचनीया
दिभागंपरिचयपटुताभ्यांतावदेकेचिरेण ॥ हरिगुरुनमनंद्रागयत्नतो
मीविधायप्रययुरपरसाम्यंसिध्ययेस्यात्धियत्नः ॥ २१ ॥ यतवचसि
जनेस्मिन्नानतेसन्निरस्यन्नासिचयवनिकांतांसांध्यजीमूतरक्तां ॥ रवि
रिवरविपूज्यांघ्रिःसमाजांतरिक्षेव्यलसदतिशयालुःसन्सहस्रप्रका
शः ॥ २२ ॥ त्रिभुवनवरतेजोव्यक्तवेदार्थशुक्लत्रितयरसतयायेवर्णि
तावर्णवर्याः ॥ पृथुमतिरथतेषामैक्यमापाद्यसम्यक्प्रवचनपरिशुध्यै
स्मप्रणौतिप्रवीणः ॥ २३ ॥ स्वरमचरमकालेमंद्रमेवात्यजद्भिःस्फुट
मुपनिषदंतेवाचकैर्वाच्यमाने ॥ प्रवचनमतिचित्रंप्राणभाजांश्रुतीनाम
मृतममृतभावस्यैषहेतुंचकार ॥ २४ ॥ धनमिवसधनायेभ्योर्कसूनुः

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसन्नःशरशतामिवपार्थःसंयुगार्थिभ्यउग्रः॥ अरतिविरहितःसोनारतं
नोदिशन्नोप्रतिवचनमदीनंचोदकेभ्योखिलेभ्यः ॥ २५ ॥ अथदशशत
शोचिष्याप्रयातिप्रतीक्ष्याःप्रवचनमवसाय्यस्नातुमायात्तटाकं ॥प्रथुम
तिरिहतावछ्रेष्ठसंसर्गलोलैःसमगमिसपदिस्वर्निम्नगाद्यैःसुतीर्थैः २६
घनरसनिकरोसावंतरत्यंतशुध्योमुनिगणइवभूयःस्नेहवान्प्राग्दधा
नः ॥ प्रतिकृतिमखिलज्ञस्यापरोक्षेणतावत्स्फुटमलभतरूपंमज्जनेस
ज्जनेष्टं ॥ २७ ॥ अपरिमितमनीषस्योल्लसच्छंखबाहोरथचरणिशिला
नांतन्वतोत्राभिषेकं॥प्रतितनवउदारास्तास्वलंसंनिधातुस्तनवइवविं
रेजुःपांचजन्यप्रियस्य ॥ २८ ॥ अभिदधातिमुनींद्राद्द्वादशाब्दोपवास
प्रतिमफलमलंयत्सेवनंभक्तियुक्तं ॥ अधिकममरनद्याद्याप्लवात्धन्य
मान्यादपिबदलवबोधोविष्णुपादोदकंतत् ॥ २९ ॥ तरणिभिरिव

CC-0. Gurukul Kangri Collection, Haridwar

गौरैरूर्ध्वपुंड्रैर्द्विषड्भिःसदरपरमचक्रोदीर्णतेजाहरीष्टः ॥ मुररिपुवि
मुखानांदुःसहोदेहभाजांलयसमयइवान्योमान्यधीराबभासे ॥ ३० ॥
समधिकाधिषणस्यप्रेक्षमाणोजनौघःप्रकृतिमधुरमास्यव्याजपूर्णेंदुबिं
बं ॥ अमुचदपसरेतिश्रावकोक्तेःपुरास्मिन्प्रचलतिपदवींतांप्रांजलि
स्तूर्णमारात् ॥ ३१ ॥ गुरुचरणसरोजद्वंद्वनिर्णेजनांभोदधतिजननि
कायेसर्वमुर्वीगतंच ॥ अवनिरनभिनंदिन्यप्यदश्चक्षमेसौकथमपिक
थमेवस्याक्षमाख्यान्यथास्याः ॥ ३२ ॥ अविदितरसभेदंशीतलंल
घ्वगंधंविमलममलपाणिःपाणिजैरप्रविष्टं ॥ वदनपवनभीत्यापार्श्वतो
बिभ्रदग्र्यंकमथकरकपूर्णंसंयमीहानिनाय ॥ ३३ ॥ विहसितविस
भंगश्रीप्रकर्षंशितिम्नाजलजममृतपूरैःपूरयामासरम्यं ॥ समयगुण
विशेषालोचकैर्लालनीयःससुरभिसुमनोभिःसस्फुटंगौरपक्षः ॥ ३४ ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

विमलमलयजांभोबिंदुभिश्चर्चितार्चोनवललिततुलस्यापुष्पराज्यार्च
यत्सः ॥ स्थलजजलजवल्लीवृक्षवीरुत्समस्तप्रसवविजयलक्ष्म्यामूर्त
येवेंदिरेशं ॥ ३५ ॥ सदददधिकबोधःषोडशान्योपचारान्‌व्यरहयद
गुणानूद्वात्रिंशदागःपुरोगान् ॥ अगणितगुणमुच्चैस्तोषयन्‌शार्ङ्गपा
णिंषडपिपरमभक्त्यानूपचारान्दिदेश ॥ ३६ ॥ तमरुणमणिवर्णंदि
व्यदेहास्यगेहेस्नपितमतिपृथुश्रद्धानदीचित्तवार्भिः ॥ ननुसयजति
नित्यंहृत्सरोजासनस्थंनतुसकृदितिपुष्पैरष्टभिर्भावपुष्पैः ॥ ३७ ॥ कृ
तपरमसपर्यःसांद्रसच्चंदनांभःपरिमलितभुजोरोमंडलांसोमनीषी ॥
स्मितरुचिरमुखेंदुःस्निग्धकौशेयवासाःससुरमुनिनराणांचक्षुषामुत्स
वोभूत् ॥ ३८ ॥ परमथपरमान्नंप्राप्तमेवाप्रयासंप्रभुरिहबुभुजेसौवेद
वादप्रवीणः ॥ अजितपरमभक्तःसंततंमन्यमानःसकलजगदधीशः

CC-0. Gurukul Kangri Collection, Haridwar

प्रीयतांशौरिरित्थं ॥ ३९ ॥ सहचरपरिक्लृप्तेसूक्ष्मवस्त्रावृतेसाववित
नुरुहरूपोशीरवर्येनिषण्णः ॥ अरमयदिहनानाहृद्यविद्याविलासैःक
विजनपरिवारंमंडयन्मंटपाग्र्यं ॥ ४० ॥ अवसरमभिगम्यभूवि
जृंभादभीष्टोमुखसततगलक्ष्मीभूतपाणिप्रवालः ॥ स्मितनयनविकासै
स्तस्यविज्ञातभावःश्रवसिकिमपिकार्यंमंत्रयामासमंक्षु ॥४१॥ प्रणति
परमकृत्याःसन्मतेर्यैजनौघाविबभुरनतिदूरेसंहतास्ताननीत्य ॥ अह
महमिकयाशुप्राप्यपार्श्वंप्रणेमुर्बहवइहगृहस्थाःपूर्वसेवांविधातुं ॥४२
विविधजनपदस्थाःप्राक्श्रुतेभ्योगुणेभ्यःशतगुणगुणमेनंविस्मितावी
क्ष्यमाणाः ॥ मुकुलितकरपद्माआस्यतामित्यवाप्ताःप्रचुरतरहृदासंभा
वयांचक्रिरेन्ये ॥ ४३ ॥ अलमलमनुवादेनानुवाच्येतपश्चान्ननुगुरव
इदानीमुद्यताहिप्रवक्तुं ॥नमननमधुनाद्रागाव्रजेत्याव्हयत्तानृश्रुतपरि

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चयसक्तान्श्रावकान्श्रावकाग्र्यः ॥ ४४ ॥ अधिकधिषणमेनंव्या
स्वयशोभमानंहरिमिवकविवर्यंसत्यवत्यास्तनूजं ॥ सततमनिमि
षंसंदृश्यसानंदचित्ताःसमयमपिगतंसंविंदतेनस्मलोकाः ॥ ४५ ॥ उ
दयमितइवास्तंयंश्चभानुर्बभासेस्फुटमकलुषरूपोदर्शनीयोनुरागी ॥
शुचिहरिपदमापत्संपदोराश्रितानांनहिभवतिविशेषःस्वप्रकाशोन्नता
नां ॥ ४६ ॥ मरकतमणिवर्णेभूतधात्रीपुरंध्यालसतिजलधिवासस्य
र्घलीनःक्षणार्धं ॥ अरुणतरणिबिंबच्छद्मनापद्मरागःकपिशकरकला
पोल्लास्यभूत्प्रेक्षणीयः ॥ ४७ ॥ अवनिवनवनध्रुग्वायुखाहंमहत्सु
प्रकृतिगुणसमेताव्याकृताकाशएकं ॥ ततमतनुमनाःसोचिंतयत्सत्स
माधावसुरसुरनरेभ्यःसद्गुणंनाथमन्यं ॥ ४८ ॥ व्यदधतपरिदृष्टज्यो
तिषःसाधुसांध्यंनियममवनिदेवाज्योतिषोप्यावलोकात् ॥ विहितम

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नुसरंतोधर्मशास्त्रप्रवीणाःसवितरिसवितारंचिंतयंतःस्त्रिलोक्याः ॥
॥ ४९ ॥ विविदुरतितरांयेदेवताःषोडशोक्ताहरहारिहयपूर्वात्याःक
लाभेदतोस्य ॥ सुहुतमतिसृजंतोग्न्याहितास्तेग्निहोत्रंव्यधुरुचितमपू
र्वंयेनगायत्रलोकः ॥ ५० ॥ विधुरयमकलंकःस्याद्यदिस्यादवश्यंननु
निजसहजायाःसुंदरास्येंदुकल्पः ॥ इतिसुरललनाभिर्लालितःखेच
रीभिःसमधिकमधुरिम्णापूर्णचंद्रस्तदोदैत् ॥ ५१ ॥ इनविरहमस
ह्यंप्राप्यपद्मैःसचक्रैश्चिरमपिपारितस्तंपूर्वतस्तैःसुतुष्टं ॥ मृदुकुमुदचको
रैःपादसंगेनराज्ञःकमापिसकलत्वद्यंकल्पयेन्नैवदैवं ॥ ५२ ॥ दलितेंद्र
नीलमणिनीलविभ्रमंनवकुंदकुड्मलसितद्विजावलि ॥ स्मितयानगो
त्तमशिरःसुजातयावनमालयासुरभिताशयान्वितं ॥ ५३॥ मृदुगामि ॥६१॥
विमानसंपदोरमयत्सुस्मितगोपसुंदरीः ॥ परितापविहीनमुज्वलंसु

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततंसूक्ष्मतरांबरंवरं॥५४॥ गोभिस्तमांस्यपनयन्नूगतिदंप्रजानामर्थांत
रंसभगवान्प्रकटीचकार॥ सानंदचिद्गुणगणंपरिपूर्णसंविच्चंद्रस्तुशब्द
गुण मित्ययमेवभेदः॥५५॥इतिश्रीमत्कविकुलतिलकनारायणपंडिता
चार्यविरचितेश्रीमत्सुमध्व० आनंदांकेचतुर्दशःसर्गः ॥ १४ ॥ छ ॥
॥ श्रीनृसिंहायनमः ॥ भूयोबोधस्ततोभूयोव्याचख्यौभाष्यमद्भुतं ॥
ग्रामेग्रामीणसामान्येवसंस्तत्रामरालये ॥ १ ॥ परपक्षरथारूढंख
रतर्कमहायुधं ॥ त्रिविक्रमार्यसोपश्यत्प्रतिवीरमिवाग्रतः ॥ २ ॥ त
दातदाननांभोजाद्धृतोपन्यासभारती ॥ सेनासेनाग्रहादिव्याशिबिरा
दिवनिर्ययौ ॥ ३ ॥ नात्यत्वराना।तिरयानस्खलंतीनिरंतरा ॥ अना
नावयवेत्येवदवीयोभिःप्रतर्किता ॥ ४ ॥ सत्रस्यंदनवृंदाढ्यादुर्वारश्रु
तिवारणा ॥ सूपपत्तिमहापत्तिर्विचित्रस्मृतिसप्तिका ॥ ५ ॥ वर्धिता

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिहरिप्रेष्ठासुपयोधरसुस्वना॥सवितानप्रकाशार्थासागरीश्रीरिवाप
रा ॥ ६ ॥ पद्मेशपदपद्मश्रित्कृत्यांगंपद्मजन्मनः ॥ लालिताशिरसेशे
नगंगेवाशेषपावनी॥७॥नारायणोनंतगुणोब्रह्माख्योवेदवेदितः ॥ वि
श्वकर्तेतिविश्वज्ञःश्रुत्यायुक्त्याप्यसीषधत्॥८॥ प्रधानमपराधीनकार
णंपरिणामियत् ॥ पयोवदितिचेत्साध्यवैकल्यंस्यान्निदर्शने ॥ ९ ॥ वि
वादाध्यासितासृष्टिश्चेतनेच्छानुसारिणी ॥ सृष्टित्वात्पटसृष्टिर्वेत्यनुमा
पक्षसाधिका ॥ १० ॥ यच्चेतनाचेतनयोरंगांगित्वादिमन्वते ॥ सृष्टा
वीशानपेक्षायांतन्नशोभनतांव्रजेत् ॥ ११ ॥ सर्वविन्निर्मितंसर्वंकादा
चित्कत्वहेतुतः ॥ नयदेवंनोतदेवंयथात्मेतीश्वरानुमा ॥ १२ ॥ बलाय
सर्वानुमानांवेदास्युर्यैरपालिताः ॥ कामादेताःप्रवर्त्ततेकामिन्यङ्ङवभ
र्तृभिः ॥ १३ ॥ कारणंपरिणामिस्याद्ब्रह्मनोचेतनत्वतः ॥ नयदित्थंनो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदित्थंयथाक्षीरपुरःसरं ॥ १४ ॥ नविश्वकृत्पशुपतिःश्रूयमाणागुण
त्वतः ॥ चैत्रवत्किंपुनर्विघ्नव्रघाद्याबालशंकिताः ॥ १५ ॥ ननुसौ
ख्यादिमान्नेशोदुःखादिरहितत्वतः ॥ योनैवंस्यात्सनैवंस्याद्यथासंसृ
तिमानिति ॥ १६ ॥ एवंचेद्विमतोज्ञानीनिर्भ्रांतिरहितत्वतः ॥ यएवं
नोसएवंनोभवीवित्यनुमीयते ॥ १७ ॥ सर्वज्ञस्याज्ञतांवेदःश्रद्धेयोनि
रुणद्धिचेत् ॥ तस्यैवामंदमानंदंवदन्नाश्राव्यसौकथं ॥ १८ ॥ दुःखं
परिजिहीर्षन्यःसुखंनांगीचिकीर्षति ॥ सहंतापतितंदुःखमीशस्यन्य
स्मरज्जडः ॥ १९ ॥ योदुःखसमवायोयंचैत्रेतन्नह्यभेदवान् ॥ समवा
यःकश्चिदीशेतदनेकत्वमन्यथा ॥ २० ॥ औपाधिकोस्यभेदश्चेत्सत्यो
सत्यःस्विदुच्यतां ॥ तद्वयंचोक्तदोषांहिमायिवन्मावदेत्परं ॥ २१ ॥
ब्रूयुरौपाधिकंभेदंज्ञानादीनांयदात्मनः ॥ नीत्यानयातान्निरासात्स्यात्त

CC-0. Gurukul Kangri Collection, Haridwar

स्यानंतधर्मिता ॥ २२ ॥ गुणादिभेदेसंबंधमपेक्ष्याप्यनवस्थितेः ॥
विशेषमात्रेणानंत्यंगुणानांशोभतेविभोः ॥ २३ ॥ मन्यंतेशून्यमेवा
न्येतत्वमागमवैरिणः ॥ मतामाध्यमिकास्तेपिव्यक्ताश्छन्नाश्चतिद्वये ॥
॥ २४ शून्यंब्रह्माह्वयेनाहुःस्वांश्चवेदांतिनोभ्यधुः ॥ अतत्वावेदकंवे
दंवदंतश्चरमेखलाः ॥ २५ ॥ परतत्वविवर्तत्वादपरस्याखिलस्यच ॥
अविशेषत्वतश्चास्यनांतरंतरमेतयोः ॥ २६ ॥ अखंडखंडनन्याया
नखंडमपिखंडयन् ॥ अखंडयदखंडज्ञोद्वयांश्चाखंडलद्विषः ॥ २७ ॥
विमतंकारणंनस्यादसत्वान्नयदीदृशं ॥ नेदृशंतद्यथाकुंभकर्तेत्यत्रानु
मीयते ॥ २८ ॥ अहोतापसनोशून्यंकारणंकुंभकर्तृवत् ॥ यत्संहृत्यु
त्थितंविश्वंतत्कारणमितीर्यते ॥ २९ ॥ एवंचेत्कारणंमास्मब्रवीःशून्यं
कथंचन ॥ आयुष्मंस्तदधिष्ठानंव्युत्थितस्स्वगुरोर्गृहे ॥ ३० ॥ वि

Digitized by Arya Samaj Foundation Chennai and eGangotri

वादस्यपदंनस्यादधिष्ठानमसत्वतः ॥ वैधर्म्येणैषदृष्टांतःशुक्त्यादि
वादितीर्यते ॥ ३१ ॥ अतत्वावेदकंमानमितिस्वव्याहतंयतः ॥ तद्वा
दीतिनवेदस्यसोभिप्रेत्यप्रमाणतां॥ ३२ ॥यंतत्वावेदकंवेदवेदांतवेददू
षकः ॥ तत्वस्यावर्णनीयत्वात्सतत्वावेदकःकथं ॥ ३३ ॥ लक्षणाभिः
प्रवर्ततेवाक्यानितिसृभिर्यदि ॥ विषयत्वंलक्षणानांतस्यैवानिष्टमाग
तं॥ ३४॥ किंचाखंडेत्रवाक्यानिकिंचिद्दिदधतेनहि ॥ तान्यभ्यधुरभा
वंचेज्जाड्यादेरुतन्नशोभते॥३५॥अभावभावस्याभावाद्भावरूपस्यत
स्यतु॥भावाभावविशेषाणामभावादविशेषिणः ३६ वेदबाह्योविपाश्च
द्भिरेपनिश्चीयतांततः॥ योवेदवेदितार्थानांनित्यंसंत्यागसंश्रवी॥३७॥
ज्यायसोदूषणेनैवधूर्त्तमन्योपिदूषितः। पक्षयोरविशेषत्वादेतयोःसद्धि
पक्षयोः।३८। असत्वादित्यसौहेतुरसिद्धोब्रह्मवादिनः॥मैतिभाण्यविशे

CC-0. Gurukul Kangri Collection, Haridwar

सत्वात्तत्वयोर्ब्रह्मशून्ययोः॥३९॥सोंगीकरोतिचेत्सत्वंब्रह्मणःस्याद्विशेषि
ता॥नचेत्प्राप्तंपारिशेष्यादसत्वंननिरस्यतु॥४०॥ विगीतंनविचार्यंस्या
न्नभाव्यंनफलप्रदं ॥ शून्यंब्रह्माद्यमद्वैतंविधिधीगोचरोनयत् ॥ ४१ ॥
खपुष्पवदखंडत्वाद्यतिरिक्तंनिदर्शनं ॥ प्रमाणादिवदित्येवमूहनीयंय
थेप्सितं ॥ ४२ ॥ आम्नायानाममानत्वेधर्मादेरप्रमाणता ॥ धर्माद्य
भावेनोमानंप्रत्यक्षैकप्रमाणिनः ॥ ४३ ॥ नपौरुषेयंवचनंप्रामाण्येन
विनिश्चितं ॥ पौरुषेयत्वतोयद्वद्वाक्यमुन्मत्तभाषितं ॥ ४४ ॥ विमतः
पुरुषोज्ञःस्यात्स्यादसौविप्रलंभकः ॥ पुंस्त्वाच्चैत्रवदित्यस्ताःसार्वज्ञ्येके
वलानुमाः ॥ ४५ ॥ दुःखाकरोतियद्वैवंदुःशास्त्रेपूर्वआग्रहः ॥ दुःखा
करोतिघोरःस्याल्लोकोतस्तद्धतांध्रुवः ॥ ४६ ॥ आस्माकेपक्षितेपक्षेमो
क्षंदद्यादधोक्षजः ॥ यत्रस्वानंदिनःसंतःसेवंतेविषयान्बहून् ॥ ४७ ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वव्याहत्यादिनोपेक्ष्या मुक्तिर्यानिर्विशेषता ॥ कदेत्याद्यनुयोगेस्यावि
शेषःस्यान्ननूत्तरे ॥ ४८ ॥ अपिबुध्यादिरहितःपुरुषार्थोनसर्वथा ॥ नि
खिलानुभवाभावात्पुत्तलीकापुरोगवत् ॥ ४९ ॥ ज्ञानप्रयत्नवांछावा
नीशोनत्यशुभंव्रजेत् ॥ स्वसामर्थ्येनतेनैवतंचकुर्यात्सताद्दशं ॥५०॥
दुःखव्याप्तंसुखंबध्येद्दष्ट्वामुक्तनिरस्यता ॥ स्वरूपंचनिरस्येतशून्य
वादीतदाभवेत् ॥ ५१ ॥ ननुविप्रतिपन्नःस्याद्भूमिमान्देहवत्ततः ॥
चैत्रोयथेत्युपाधिःस्यादत्रचाशुद्धदेहिता॥ ५२ ॥ अनैकांतिकताहेतो
र्देहवत्त्वादधीशितुः॥ सोदेहश्चेदनिच्छादिर्भवेच्छशविषाणवत्॥५३॥
ज्ञात्रादिरूपमस्यस्याद्वैलक्षण्यायचेत्ततः ॥ तदेवदेहशब्दोक्तंनह्यसौ
प्राकृताकृतिः ॥ ५४ ॥ एवंस्वरूपदेहलंमुक्तस्याप्युररीकृतं ॥ नानि
ष्टभोगस्तेनस्यात्प्राकृतक्षेत्रसंभवः ॥ ५५ ॥ विमतोनावयववान्विना

CC-0. Gurukul Kangri Collection, Haridwar

शिल्पप्रसंगतः ॥ पटवच्चेदवयवानिरस्यंतेत्रकीदृशाः ॥ ५६ ॥
सिद्धसाधनताहेतोस्तेभिन्नाश्चेदचिन्मयाः ॥ आत्मनोभेदरहिताएष्ट
व्याएववादिभिः ॥ ५७ ॥ परमाण्वादिदेशेषुव्याहत्यैव्यामादिकेष्व
पि ॥ यथात्मनःप्रदेशाःस्युस्तेषांनोवयवास्तथा ॥ ५८ ॥ मुक्तोरूपा
दिवित्स्वाज्जडान्यत्वेसतीशवत् ॥ दृष्टांतोसाध्यविकलस्तस्यसर्वज्ञ
ताग्रहात् ॥ ५९ ॥ ईश्वरोनसुखीतेनरूपाद्यनुभवन्नपि ॥ दुःखप्रसं
गादितिमावादितद्व्याप्तिदूषणात् ॥ ६० ॥ दृष्टांतोयस्यनेष्टोयंतस्य
स्याद्व्यतिरेकवान् ॥ शिलावदित्यतःशुद्धचिद्देहेंद्रियभोग्यसौ ॥ ६१ ॥
स्वानंदविषयेमोक्षेवेदोक्तेयुक्तिसाधिते ॥ द्वेषोयंवादिनांकस्मात्तद्विरुद्धे
थवाग्रहः॥६२॥ततःस्वतःप्रमाणेनदेवोवेदेनवेदितः॥विष्णुर्मोक्षादिदा
तेतिविश्वंभवतिशोभनं ॥६३॥ इत्यादीन्दर्शयंत्यर्थान्व्याख्योपन्या

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ससंयुता ॥ त्रिविक्रमार्येणतदाविश्वाभिज्ञस्यशुश्रुवे॥६४॥अथप्रायुंक्त
विविधानूबोधचापगुणेरितान् ॥ विपक्षयुक्तान्वीर्येणतीक्ष्णांस्तर्कश
रानसौ ॥ ६५ ॥ चिच्छेदातुच्छधिषणस्तांस्तदातर्कसायकैः ॥ प्रयुक्त
मात्रान्प्रहसन्लीलयातिशयालुभिः ॥ ६६ ॥ अधार्याणीतरजनैर
निवार्याणिपूरुषैः ॥ विजिगीषुर्द्विजश्रेष्ठोवेदास्त्राणिप्रयुक्तवान्॥६७॥
वाक्यैरतिबलीयोभिःप्रत्यस्त्रैरिववैदिकैः ॥ अर्थांतरंप्रकटयन्तान्य
सौसंन्यवर्तयत् ॥ ६८ ॥ सप्ताष्टानिदिनान्येवंवादंकृत्वासहामुना ॥
निरुत्तरंतंनिश्चाद्यंचक्रेचक्रायुधप्रियः ॥ ६९ ॥ प्रणम्याचष्टशिष्टोसौ
क्षम्यतांनाथचापलं ॥ पदेपद्मरजोदास्यंध्रुवंमेदीयतामिति ॥ ७० ॥
व्याख्यांभाष्यस्यभूयोधीःश्रवणसूरिनंदनः ॥ संतःप्रीतिमसंतोन्यां
सममारेभिरेततः ॥ ७१ ॥ गुर्वाज्ञागौरवाट्टीकांकुर्वन्भाष्यस्यदुष्क

CC-0. Gurukul Kangri Collection, Haridwar

रां ॥ षडर्धविक्रमार्यौसौमहाचार्यमवोचत ॥ ७२ ॥ कवींद्रैर्नसमा
प्यंतेसंगृह्यापियतोनिशं ॥ न्यायरत्नानिभाष्याब्धेरस्यगांभीर्यम
द्भुतं ॥ ७३ ॥ दशोपनिषदोदेवीर्देवाइवसमीप्सिताः ॥ युक्ताःप्रसाद
यत्यर्थायेषुभाष्यालयेष्वलं ॥ ७४ ॥ गीतातात्पर्यभाष्याभ्यामाभ्यां
विश्वंप्रकाश्यते ॥ गोगणैरप्रतीकारैरर्केंदुभ्यामिवाधिकं ॥ ७५ ॥ इ
तिहासपुराणाब्धेर्भवच्चित्ताद्रिलोडितात् ॥ जातांभारततात्पर्यसुधां
कःसन्नसेवते ॥ ७६ ॥ पुराणस्थानपांथानामभाषात्रयवेदिनां ॥ भव
तासुसखाचक्रेश्रीभागवतनिर्णयः ॥ ७७ ॥ कस्तंत्रसारंसंप्राप्यन
स्यात्पर्याप्तवांछितः ॥ अमरैराश्रितच्छायंकल्पद्रुममिवोत्तमं ॥७८॥
लोकानामवलोकायमार्गस्यास्यठ्यधाद्भवान् ॥ करुणाकरनेत्राभेवा
दसन्मानलक्षणे ॥ ७९ ॥ एकाकीकिलयश्चक्रेपदंमौलिषुविद्विषां ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्वनिर्णयपार्थोयंकेनन।मनपूज्यते ॥ ८० ॥ वादादयःप्रकरणस्फु
लिंगास्तनवोप्यलं ॥ विपक्षकक्षंक्षिण्वंतिमारुतेनत्वयेरिताः ॥ ८१ ॥
अनंतोर्थःप्रकटितस्त्वयाणौभाष्यसंग्रहे ॥ अहोआत्मपरिज्ञप्त्यैक्ष
णेनेवाननांतरे ॥ ८२ ॥ भगवंश्चित्रकवितांलौकिकींदर्शयन्किल ॥
गोप्यंभारतसंक्षेपमक्थाविश्वविस्मयं ॥ ८३ ॥ नानासुभाषितस्तोत्र
गाथादिकृतिसत्कृतीः ॥ त्वयिरत्नाकरेरत्नश्रेणीर्वागणयंतिके ॥ ८४
एषुदभ्रमतीन्दभ्रान्हसत्युच्चैःसतांसभा ॥ चिंतामणींश्चिंतयंतीमिता
न्यप्यमितार्थदान् ॥ ८५ ॥ अपरोपीष्यतेस्माभिर्ग्रंथेष्वेतेषुसत्स्वपि
॥ सत्स्वर्पींद्रादिषुपुरातारकारिरिवामरैः ॥ ८६ ॥ ग्रंथेभ्यएभ्योगा
धेभ्योयुक्तयोनोद्धरुद्धराः ॥ मनोमांद्यात्ततोग्रंथंव्यक्ततर्कततिंकुरु ॥
॥ ८७ ॥ इत्यर्थितोव्यधान्मध्वःसोनुव्याख्यांसतांसुधां ॥ दुर्वादिग

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाद्रिपविंमायिध्वांतरविद्युतिं ॥ ८८॥ युगपद्ग्रचयन्नेनाकदाचित्सानि
रंतरं ॥ चतुरश्चतुरःशिष्यान्लीलयालेखयत्खलु ॥ ८९ ॥ युक्ताया
युक्तिमालायाःप्रोक्तायास्तत्रचात्मना ॥ व्यक्तंचक्रेविवरणंकर्वीद्रैरेष
दुष्करं ॥ ९० ॥ मध्वेंदोर्नित्यसंबंधान्निस्तमस्तापचेतसोः ॥ वैकुंठंया
तयोःपित्रोर्गृहेस्यावरजोवसत् ॥ ९१ ॥ विधिभ्रुविभ्रमभ्रंश्यद्धनगो
धान्यसंपदा ॥ निर्वेदिनावेदविदोतनापेवेदवादिराट् ॥ ९२ ॥ पारि
व्राज्यंप्रार्थयंतंपादानम्रमिमंमुहुः ॥ समयापेक्षयोर्वीक्षोगमयामासधा
मतं ॥ ९३ ॥ नजघासनसुष्वापनजहाससधीरधीः ॥ समयार्थीस्म
रन्ज्येष्ठंरामंरामानुजोयथा ॥ ९४ ॥ राज्येकथंचिन्निक्षिप्यराजानं
विरहार्दितं ॥ अवतारभुवंप्रायाद्भगवान्शरदत्यये ॥ ९५ ॥ विशुद्ध
द्विकुलंश्रौतंशुचिंकृतपितृक्रियं ॥ विरक्तंविषयान्भुक्त्वान्यधान्मध्वो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नुजंयतिं ॥ ९६ ॥ रहस्यातिरहस्यंतब्रह्मब्रह्मसमोददौ ॥ अमुष्मैपंच
तपसोनविदुर्यत्तपस्विनः ॥ ९७ ॥ प्रेमामृतप्रसन्नास्यस्मितांगापां
गपूर्वकं ॥ श्रीविष्णुतीर्थनामास्मैप्रीतितीर्थःप्रदत्तवान् ॥ ९८ ॥ श्र
वणेनानुवादेनमननेनाप्यथाकरोत् ॥ कालंवेदांतशास्त्रस्यवेदांतंगु
रुसोदरः ॥ ९९ ॥ सदांतिभक्तिमाधुर्यपरिचर्यादिमेदुरैः ॥ महाविट
पिनंचक्रेगुरोःस्वस्थंकृपांकुरं ॥ १०० ॥ अनंतमतिकारुण्यकल्पद्रु
मवतोजनैः ॥ अवर्ण्योमहिमातस्यलौल्यात्संवर्ण्यतेमनाक् ॥१०१ ॥
चतुरोसौप्रवचनेमनुसंसिद्धिमात्मनः ॥ संख्यामांपूरणीमागान्मध्व
दासामितिव्यधात् ॥ १०२ ॥ दिशंप्रयांतंशशिनश्चरंतंभूव्यशोधय
त् ॥ तीर्थकंविष्णुतीर्थंचविष्णुतीर्थश्चतीर्थकं ॥ १०३ ॥ अकामाना
मनेकेषांसिद्धिभूमिंतपस्विनां ॥ तिरोहितात्माप्रापासौहरिश्चंद्रम

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हीधरं ॥ ४ ॥ द्वंद्वदुःखानलेवीरोमात्सर्येणविमत्सरः ॥ तत्याजमलात
स्यासावशनादींधनायितं ॥ ५ ॥ भक्तैरनुगिरंनीतंप्रार्थितोयतिशेख
रः ॥ पंचगव्यंपपौकिंचित्पंचमेपंचमेदिने ॥ ६ ॥ सत्यजन्साहसीत
त्व्रतपस्तेपेतितापसं ॥ बिल्वपर्णैःक्षितौपन्नैस्तृप्तिमान्सलिलैरपि ॥
॥ ७ ॥ यथेष्टमध्यास्तशिलांयमीसुनियमीसतां ॥ नाध्यासतेयामेका
हंदैवभग्नास्तपस्विनः ॥ ८ ॥ पवनांशानुजोजित्वापवनंरेचकादिभिः ॥
विषयेभ्योहृषीकाश्वान्मनोयंत्रासमाहरत् ॥ ९ ॥ स्मरन्मुरारेराकारं
दध्यावध्यात्मकोविदः ॥ समाधिमाधिशमनंयोगलभ्यंसलब्धवान् ॥
॥ १९० ॥ मौकुंदेसुंदरेरूपेस्वानंदादिगुणार्णवे ॥ स्वाश्चर्यरत्नेमग्ना
त्मानान्यत्किंचिद्विवेदसः ॥ ११ ॥ कामत्रासविहीनस्यतस्यसुज्ञानच
क्षुषः ॥ विनाकैवल्यसाम्राज्यंनार्धोयोगमणेरभूत् ॥ १२ ॥ मध्वानु

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जेमध्वनाथोयंप्रसादंव्यधात्तदा ॥ सचित्ताविषयत्वाद्वागोप्यत्वाद्वानव
र्ण्यते ॥ १३ ॥ अहामहाबोधसेवामहिमास्मिन्युगेयतः ॥ धन्योसौ
सिद्धिमापेमांसोमरैरित्यलाल्यत ॥ १४ ॥ तीव्रव्रतोतींद्रियविद्विद्या
ब्धिस्तर्कपंडितः ॥ अनिरुद्धपदाधारःश्रेष्ठःशिष्यस्तमाययौ॥ १५ ॥
तेनसंप्रार्थितंप्राप्तरूप्यपाठमिमंपुनः ॥ कृत्स्नज्ञंकृपयास्वेषुसंप्राप्तंमे
निरेप्रजाः ॥ १६ ॥ कवींद्रतिलकोविद्वच्छेखरस्तापसाग्रणीः ॥ मध्व
केलीशुकोस्याभूच्छिष्योव्यासपदाश्रयः ॥१७॥ असौदास्यंध्रुवंयांतं
महांतमहतामपि ॥ व्यधादनुग्रहंकुर्वन्सामर्थ्यैःकौतुकंनृणां ॥ १८ ॥
आरुरोहदुरारोहंसपरैःप्रीतिकृद्धरेः ॥ महांतंमहिमानंचमहीध्रंचगु
हाप्रियं ॥ १९ ॥ आकृष्टोस्यगुणैर्व्याप्तैर्योगोदायाउपाययौ ॥ सपद्म
नाभतीर्थाख्यःशिष्योन्योभूत्सुचेतसः ॥ १२० ॥ श्रुत्वामत्वासदाभ

CC-0. Gurukul Kangri Collection, Haridwar

क्तयाविरक्तयानित्यसेवया ॥ अस्मैप्रसन्नःप्राज्येक्षःसद्योविद्यांददौशु
भां॥ २१॥ वेदांताब्धिंधनयोजातुजहौविद्वत्तिमिंगिलः ॥ युक्तिप्रवाहस
रंभात्परशास्त्रनदीचरः ॥ २२ ॥ व्याख्याप्रणादमात्रेणवीरंमन्यान्
स्वमंडले ॥ मायाविग्रामसिंहान्योवादिसिंहोनिराकरोत् ॥ २३ ॥
मत्तदुर्वादिमातंगतर्कमस्तकदारणे ॥ पंचास्योयोभवव्द्यक्तंचतुरास्यो
पिकेवलं ॥ २४ ॥ संन्यायरत्नावलिरप्युदपादियतःशुभा ॥ टीकाप
रानुव्याख्यायाअनर्घाबोधसागरात् ॥ २५ ॥ वेदप्रवचनाचार्यशि
ष्योसावितिपूजितः ॥ सभ्यःसभायांयोवेदंव्याचख्यौवेदसारवित् ॥
॥ २६ ॥ अनयोःप्रथमेशिष्याश्चरमेचाभवन्निह ॥ अनंतबोधस्याने
केयतींद्राबहुदेशजाः ॥ २७ ॥ वशीकृतत्वदपीकाश्चजननाद्युपमर्दिनः ॥
नरसिंहपदाधाराअभ्यस्तोपेंद्रनामकाः ॥ २८ ॥ अदीर्घान्याभिधा

नायेश्रीमद्रामपदाश्रयाः ॥ अप्रत्यक्षगुणोद्रिक्ताभक्तिवैराग्यसागराः
॥ २९ ॥ पादैःपुनंतःपृथिवींदर्शयंतोहरेःपदं ॥ धूतदुःसमयध्वांताआ
दित्याइवगांगताः ॥ १३० ॥ मोक्षशास्त्रामृतांभोधिसेवयानित्यनिर्वृ
ताः ॥ चक्रिचारुतरार्चासुचक्रिणश्चरणार्चकाः॥३१॥मध्वप्रशिष्याबह
वःशिष्यायेषांमुहुस्तथा॥अलंचक्रुरलंपृथ्वींसर्वेसद्गुणभूषणाः३२सदा
सकलसच्छास्त्रव्याख्यासौख्यामृताब्धिगाः ॥ सर्वेदुर्वादिदुर्वादकांड
खंडनमंडनाः ॥ ३३ ॥ भूरिभक्तिभराःकेचिदप्यल्पश्रुतिसंपदः ॥ अ
प्यल्पबोधाअपरेबहुश्रुतमहागुणाः ॥ ३४ ॥ बहवोग्राहिणोप्यस्मात्स
मग्रानुग्रहंययुः ॥ दीप्तायत्राग्नयइवत्रयोलिकुचशेखराः ॥ १३५ ॥
माध्वनियोगंयेप्रायोनात्यजन्विदुषांवराः ॥ शिष्यक्षेत्रेषुसद्विद्याबी
जावापैकदीक्षिताः ॥ ३६ ॥ ग्रामण्योब्राह्मणाग्रण्यःप्रापुःपूर्णेक्षशि

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

ष्यतां ॥ येषांसद्गुप्तिमात्रेणभवेत्किलपरंपदं ॥ ३७ ॥ शुश्रूषापक्षपा
ताद्यैःकेभ्यश्चित्कैवल्यंददौ ॥ रामप्रियोरामइवस्वांगतिंयोगिदुर्लभां
॥ ३८ ॥ शिष्यप्रशिष्यातिशयाईदृशायद्दयोदयात् ॥ कोनेच्छत्सुल
भंभक्त्यातत्पादसुरपादपं ॥ ३९ ॥ इत्थंसद्भिःसद्भिरचर्योधरायांचक्रे
वासंशेषशय्येशयाने ॥ ग्रामेवातेःपावितेकाण्वतीर्थैर्भक्तप्रीत्यासन्म
ठेनूनबोधः ॥ १४० ॥ आनंदतीर्थभगवद्वदनेंदुबिंबंविद्यासुधोवितत
कांतिसुकांतिकांतं ॥ यैःप्रेक्षतात्रभवतापशमायभक्तैस्तद्दासदास्यम
पिकिंनददातिपुंसः ॥ १४१ ॥ इतिश्री०नारायणपंडिताचार्यविरचि
तेश्रीमत्सुमध्वविजयेमहाकाव्येआनंदांकेपंचदशःसर्गः १५ ॥ छ ॥
॥ श्रीनृसिंहायनमः ॥ साधुभ्योमधुमथनांघ्रिभक्तिभाग्भ्यःश्रौतेभ्यो
विततमतेर्महानुभावं ॥ वेदांतंस्वयमिवबंधमोक्षमूलंव्याचष्टस्फुटमथ

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोपिकोविदोत्र ॥१॥ गोमत्यास्तटनिकटेच्छकीर्तिचंद्रं विश्वज्ञांक्षितिप
तिरंत्यवर्णजन्मा ॥ विद्वेष्टाश्रुतिगुणसाधकंश्रुतीनांवाचालोवचनमुवा
चवाग्मिवर्य्यं ॥ २ ॥ उन्मत्तप्रलपितवन्नतद्धिमानंयद्वाक्यंव्यभिचर
तिक्कचित्फलेत्र ॥ दृष्टांतोभवतितदप्रमाणतायांसर्वेषांश्रुतिवचसांचस
र्वथेति ॥ ३ ॥ वेदोक्तंफलमलमाप्यतेधिकारादित्युक्तोतनुमनसाभ्य
धत्तधूर्त्तः ॥ योग्यत्वेसतिनहिदृश्यतेधिकारीनातःस्यात्सखरविषाणव
त्सदेति ॥४॥ आक्षेपंतमसहमानउच्चमानःसद्योसौनिजकरपल्लवद्वयं
न ॥ आदायव्यतनुतबीजमोषधीनांसूक्तेनांकुरदलपुष्पबीजसृष्टिं ॥
॥ ५ ॥ व्याख्यातानिशिसकदाचनप्रदीपेसंशांतेपुनरपिवाचयांबभूव
॥ शिष्यान्स्वान्पुरुकरुणांबुधिर्निजांघ्रेरंगुष्ठस्फुटनखरांतरोचिषैव ॥
॥ ६ ॥ तीर्थार्थंपृथुतरवप्रपातिवारांधाराणांरयसहनक्षमांमहेक्षः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनीतांदशशतपुंभिरत्यशक्त्याप्रेक्ष्योचेविपुलशिलांकाचित्समुक्तां ॥
॥ ७॥ लोकानामुपकृतयेकुतःशिलेयंनिन्येनोइतिजनताजगादतत्र॥
नेतारोयतिवरमानवानहीमांभीमश्चेदिहयततेनयेन्नवेति ॥ ८ ॥ नि
न्येतांगिरिमिववानरीकृतात्मालीलावत्करकमलेनसोमलेन ॥ तत्रापि
न्यधिततयास्यसूच्यतेलंतत्तुंगांननुनिकषाधुनापिकर्म ॥ ९ ॥ संघातै
रधिकथनैरलंकृताध्वाशिष्याणांयतमनसामुतेतरेषां ॥ यत्रामावसति
तिथाविनेनचंद्रस्तत्रासौसकलमतिःससारसिंधुं ॥ १० ॥ आर्द्रांगाः
सपदिनिमज्जनात्सरस्यांकण्वस्यद्विजऋषभस्यवल्लभायां ॥ तत्रायन्
खरकिरणोपरागहेतोर्ग्रामीणाअपिसकलाःसबालवृद्धाः ॥ ११ ॥ स
र्वज्ञंसपरिजनंसमीक्ष्यमाणाःफुल्लाक्षाःस्मितवदनाःशुभाननंदुः ॥ दौ
र्मुख्यंदधतउतापरेनिनिंदुर्नाश्चर्यंद्वयमपितत्स्वभावतंत्रं ॥ १२ ॥ मा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मैनंभुवनगुरुंविनिंदतेत्थंनिर्भत्स्यांभ्यपतद्दिवोत्तरंगहस्तः ॥ संक्षोभी
घनघनघोषघोरवेषःसंरंभीखलदमनायसिंधुराजः ॥ १३ ॥ संमोदा
त्तरलतरोद्रुताभिगामीगंभीरस्वननुतिमान्सुफेनहासः ॥ वीच्यंगैर
धिकतरैरिहाधिवेलंमध्वायप्रणतिमिवव्यधात्समुद्रः ॥ १४ ॥ गोली
लास्वतिशयिनावगाधभावान्नोल्लंघ्यौविविधगुणप्रकाशरत्नौ ॥ मध्वा
ब्धीपरममतेःप्रियंजनानांलावण्यंनतुजलधेरयंविशेषः ॥ १५ ॥ अं
भोधेस्त्वरिततरोर्मिपाणिमृष्टेस्वच्छेसौविकटतटासनेनिषण्णः ॥ व्या
चख्यावतिचिरमैतरेयशाखासूक्तानिप्रभुरतिसुंदरप्रकारं ॥ १६॥ गां
भीर्यास्त्वनमधरीकरोतिसिंधोःश्राव्यत्वंवहतितथाप्यहोस्वनोस्य ॥ पू
र्णेंदुप्रभवदनःकएषधन्योमत्वेत्थंजनजलधिस्तमाशुपर्यैत् ॥ १७ ॥
वेदानांसमुचितभाववाददक्षंयेवेदद्विषमिममूचिरेमहेर्ष्याः ॥ धिक्धि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रानितिजनताजगादगाढंस्वाश्चर्यात्किलकलितांजलिर्नमंती ॥१८॥
सन्मानंविपुलत्वदेविधायभक्त्याबिभ्राणाश्चरणरजोस्यदेवसेव्यं ॥ त
त्स्नानादधिकशुचौनदाधिराजेसस्नुस्तैर्द्विजनिकराःप्रशस्तकाले ॥
॥ १९ ॥ कल्लोलैःकरिनिकरैरिवानिवार्यैरुल्लोलैर्जननिकरान्निपातय
द्भिः ॥ आक्रांताःप्रबलतरैश्चलोड्यमानाहास्यत्वंप्रययुरुदन्वतीहनैकं
॥ २० ॥ मज्जंतंपृथुलहरीनिगूढमार्तिंसंपूर्णप्रमतिमसज्जनोजहास ॥
योलोकत्रयविजयीगुरुःप्रसिद्धःसोयंहापततिलघूर्मिलीलयेति ॥
॥ २१ ॥ नीचानामवचवचांस्यजीगणन्नोदभ्राणांक्षुभितकराण्यदस्नसं
स्यः ॥ क्रोष्टृणांइवकलकलप्रदंविरावंपंचास्योनहिणगयेदुदारवीर्यः
॥ २२ ॥ जन्मास्थित्यवसितिदायिनंकटाक्षंलोकानामघटयदंबुधौबृह
त्धीः ॥ आक्रांतोधिकगुरुणासतेनतावन्मुंचन्नसंचलनमभूत्तटाकदे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वयः ॥ २३ ॥ इत्याद्यैरपिचरितैरनन्यसाध्यैर्नस्थेष्ठांबहुमतिमापदुर्ज
नोस्मिन् ॥ विद्वेषंव्यधितपुनर्निरस्तभाग्येतस्मिन्दुर्मनसितदेवशो
भनंस्यात् ॥ २४ ॥ संप्राप्तंसहसहजेनगंडवाटंस्वोजःसंप्रकटनआ
दिशद्दिशंकं ॥ शुश्रूषामयमुचितोविधातुमीषल्लोकानामितिवचसाप
रीक्षकाणां ॥ २५ ॥ श्रीकांतेश्वरसदनेनयत्किलैकोयास्त्रिंशन्नरवरनी
तकेतुयष्टिं ॥ आहत्यागुरुगददैवनारिकेलाद्योलेभेतरलतरात्फला
निकामं ॥ २६ ॥ एतादृग्बलविभवःसतस्यकंठंतज्ज्येष्ठोप्यभितउभौ
समंगृहीत्वा ॥ निष्पेष्टुंपरममवापतुःप्रयत्नंसंघर्षात्क्रमपरिवर्धमान
तैक्ष्ण्यं ॥ २७ ॥ आस्विन्नावलसतरौगुरोर्नियोगाच्छत्राग्ग्यानिलम
हितौचतावुभाभ्यां॥ मुक्तःायःकठिणतरत्वचंशिरोधिंपर्यायात्स्फुटवच
नांनिपेततुःकौ ॥ २८ ॥ आश्वस्तौशुचिहृदिमावनूनमानावुत्थतुंसम

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गदद्दंगुलींधरास्थां ॥ संगृह्यप्रसभरसादतिप्रयत्नौसामर्थ्ययतुरि
मौनकंपनेस्याः ॥ २९ ॥ निर्यत्नंबटुमधिरुह्यमंदहासीसप्रायादिहप
रितोन्नृसिंहगेहं ॥ ऐश्वर्यैरितिलघिमादिकैरुपेतोमधवोभूत्त्रिभुवन
चित्ररत्नराजः ॥३०॥ पंचाशन्नरपनरोपर्नातमात्रांयोवार्क्षीगृहमधिरो
हिर्णीनिनाय॥सव्याख्यास्वरदमनायपूर्ववाटोनिर्देशाव्द्याधितगुरोर्ग
लप्रपेषं ॥ ३१॥ स्विन्नेस्मिन्नपियतमानआग्रहोग्रेप्राच्यात्तत्प्रवचननि
स्वनोतिरेजे ॥ उत्धर्तुंविपुलत्वदंगुलिंचनालंसोभूदित्यजनिकुतूहलंन
राणां ॥ ३२ ॥ पर्यैक्षिप्रभुरितरैःशिवाग्निपूर्वैर्नोपेक्षिप्रबलतरैस्तथा
प्रयत्नैः ॥ नावैक्षिक्वचिदपिशक्त्यपूर्तिरस्मिन्नुत्प्रेक्षिस्वयमपिभीमइत्य
वश्यं ॥ ३३ ॥ लेखिन्यामुहुरपिनह्यकृष्यमाणंनाप्येकंतनुरुहमस्यतूद
पाटी ॥ नासाग्रेमृदुनिकृतैश्चमुष्टिघातैर्नास्येंदोरातिबालिभिःप्रसन्नता

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सि ॥३४॥ पंचास्यः श्वभिरिववैर्विहीनसारैरंभोधिर्नंदसरितांजलैरिवा
ल्पैः॥खद्योतैरिवतरणिर्विडंबयन्ननूप्रत्यर्थिस्वसमनरैर्व्यवाहरत्सः।३५
पारंतीसुरसदनंविशालसंवित्सप्राप्तःखलुसुचिरान्निवेद्यहीनं ॥ग्राम्या
ग्र्यक्षितिपतिभिर्दिनार्धमात्रात्तद्भूतीर्व्यधितसभूतबल्यनल्पाः ॥३६॥
भीमलेसहसहजैःप्रतिष्ठितःप्राक्पंचात्मामुररिपुरंचितोयदत्र ॥ पांचा
ल्याबलिसलिलंसमंददत्यासोस्मार्षीत्तदिममथप्रपूज्यपूज्यः ॥ ३७॥
आयास्यन्किलसरिदंतराख्यदेशंग्रीष्मेनिर्जलमिहशुश्रुवांस्तटाकं ॥
तत्कालेपरमभिवर्षयन्घनौघंतत्पूर्त्यैव्यधितकुतूहलंनराणां ॥ ३८ ॥
दुर्मंत्रैःखलपटलैःप्रचोद्यमानोग्रामेशोवृषलपतिःप्रहर्तुमेनं ॥ संप्राप्त
स्ततउतयांतमीक्षमाणःप्रोद्यंतंरविमिवविस्मितोननाम ॥ ३९ ॥ क्षेत्रा
ग्र्यंत्रिभुवनवैद्यनाथनाथंप्रस्थायप्रचुरतरांतरःप्रभावी ॥ श्रीकृष्णामृ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपरमार्णवाभिधानांचक्रेसद्वचनततिंस्वभक्तभूत्यै ॥ ४० ॥ सग्रामंपर
मपियातउच्चभूतिंविद्वांसःक्वकुहरकूपदर्दुराभाः ॥ इत्यूचेमदमतिमा
निनोखिलज्ञंमन्यस्यक्षपयितुमेवतज्जनस्य ॥ ४१ ॥ सर्वज्ञोप्ययम
धिकंनयज्ञभंगींसंवित्तेयतिरितिबद्धनिश्चयोसौ ॥ आभांतंपरिषदिम
त्सरादपृच्छत्कर्मार्थश्रुतिगहनार्थखंडभावं ॥ ४२ ॥ छंदोभ्यश्च्युतर
ससंग्रहप्रवीणान्षष्ठोन्हिप्रातिविहितान्प्रजाधिपेन ॥ नाराशंस्यचर
मचारुमंत्रभेदानूचेसौतमभिदधद्विसंशयांशः ॥ ४३ ॥ पांडित्यंपरम
मवेक्ष्यतस्यतादृक्संघर्षक्षुभितमनाविपक्षसंघः ॥ नार्थख्यादयमितिव
र्णयन्नथत्वंतंब्रूहीत्युरुमतिनेरितोद्रवद्वाक् ॥ ४४ ॥ सोपृच्छत्तमथमहा
व्हयोपसर्गायत्रोक्तामनुचरणोपसृज्यरूपाः ॥ तस्यार्थंवचनचयस्यतं
ब्रुवाणःस्थैर्यार्थंसपदिसलेखयांबभूव ॥ ४५ ॥ संपूर्णंशशिनामिवोदि

CC-0. Gurukul Kangri Collection, Haridwar

तंकृशःश्वाचुक्षोभाशुभनिकरोनिरीक्ष्यमध्वं ॥ प्रत्यर्थींस्वयमितिदूरतो
भिधावन्किंतेनक्षतममृताकरस्यतस्य ॥ ४६ ॥ निस्वानांकतिपयभु
क्तियुक्तभक्तंभक्तानांव्यधितचतुर्गुणंदयालुः ॥ भुङ्क्तेस्मात्रिदशनरोप
भोज्यमन्नंसंप्रीत्यैसधनवतांबृहत्प्रबोधः ॥ ४७ ॥ वृष्ट्यादेःसनियम
नादिचक्रएतच्चित्रंकिंभुवननियामकेसमीरे ॥ अप्येवंभुवनगुरोःकृता
नुवादःकृत्येषुप्रवरइतीहवर्णयामः ४८॥इत्यूचेधरिणिसुरेणकेवलंनो
माध्वीयंविविधकथाकथासुमान्या ॥ साक्षादप्यमरवरैरुदीर्यमाणागं
धर्वैर्घुसदसितन्मुदेजगेसौ॥ ४९ ॥ तांपद्यप्रणिगदितांतुमूर्छयित्वाता
नानामुचिततयात्तपंचमाद्याः ॥ गांधारंद्युविषयमुज्ज्वलंसृजंतोग्रामंते
प्रजगुरकाकिकस्वकंठाः ॥ ५० ॥आनम्रैःसुमुकुटमौलिभिःकराग्रैरा
ताम्रैःप्रतिकलितैःस्मितैर्मुखाब्जैः ॥ आश्चाविःस्थिरतरभक्तिभिःसुरेंद्रै

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तद्गीतादशाधिषणार्यवर्यचर्या॥५१॥ गीर्वाणैर्विजयमहोत्सवस्यपूजां
कुर्वाणैरविरलसंविदस्तदानीं ॥ विस्मेरैर्मुनिनिकरोपदेवयुक्तैःसुस्मेरै
रथतमवेक्षितुंप्रजग्मे ॥ ५२ ॥ आदर्शंगुणगणदर्शनेमुरारेःसच्छास्त्रं
रचितमनेनवर्णयंतः ॥ प्रद्योतैरुडुपदवींप्रसादयंतःप्रैक्षंतःप्रचुरमनो
विलासमेते ॥ ५३ ॥ नाकींद्रास्तमवनिभागमावसंतंसुश्लोकैरपिभु
वनानिभूषयंतं ॥ नेमुःस्वादुपनिषदंतदैतरेयंव्याख्यंतंविविधविशिष्ट
शिष्यमध्ये ॥ ५४ ॥ श्रीमंतंशशिवदनंकुशेशयाक्षंगंभीरस्वरमति
दिव्यलक्षणाढ्यं ॥ पश्यंतःस्वगुरुमथार्चयन्कृतार्थावाण्यातंहरिरति
पूर्णकाममेते ॥ ५५ ॥ अहरोदुरागमतमःस्वगोगणैरकरोर्मुकुंदगुण
वृंददर्शनं ॥ अजयश्चतुर्दशजगंतिसद्गुणैःशरणंगुरोकरुणयापिनोभ
वेः ॥ ५६ ॥ नमस्तेप्राणेशप्रणताविभवायावनिमगानमःस्वामिन्रा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ इति श्रीसुमध्वविजयसमाप्तः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मप्रियतमहनूमनूगुरुगुण ॥ नमस्तुभ्यंभीमप्रबलतमकृष्णेष्टभगवन्न
मःश्रीमन्मध्वप्रदिशसुदृशंनोजयजय ॥ ५७ ॥ इतिनिगदितवंतस्त
त्रवृंदारकेंद्रागुरुविजयमहंतंलालयंतोमहांतं ॥ ववृषुरखिलदृश्यंपु
ष्पवारंसुगंधंहरिदयितवरिष्ठेश्रीमदानंदतीर्थे ॥ ५८ ॥ इतिश्रीमत्क
विकुलतिलकत्रिविक्रमपंडिताचार्यसुतनारायणपंडिताचार्यविरचिते
श्रीमत्सुमध्वविजयेमहाकाव्येआनंदांकेषोडशःसर्गःसमाप्तः ॥ १६

इदंपुस्तकंमोहमय्यांपुरि ईश्वरतत्वप्रकाशयंत्रालये कशाळीकरोपाभिधरामकृष्णात्म
जेन लक्ष्मीनारायणचरणाब्जसेवापरायणेनानंतशर्मणा श्रीमद्विष्णुभक्तमुदेयत्नतोमु
द्रितम् ॥ शके १८०४ चित्रभानु नाम्निसंवति चैत्र शुक्लद्वितीयायांमुद्रयित्वासमाप्ति
मगमत् ॥ ॥ शुभंभवतु ॥ ॥

४८, ८८६

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ARCHIVES DATA BASE
2011 - 12

R813,ATH-A
44887

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म् ।

सा० संख्या ______ पंजिका संख्या ______

पुस्तकों पर सर्वप्रकार की निशानियां लगाना अनुचित है ।

कोई विद्यार्थी पन्द्रह दिन से अधिक पुस्तक नहीं रख सकता ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar